देवान् नागेंद्रंवासुकिं बलेनावर्धयत् असुरान्

तस्यगिरेरावर्त्तनंभ्रमणं अंगकंडूयनंमेने १० आसुरेणअसुराकारेणदैवेनदेवाकारेणआविशत् ११ १२ आत्मनिरिवदैत्यमध्ये गोत्रेरार्ध्यरूपेणनेत्रेअप्रमेयाबो

सुरासुरेंद्रैर्भुजवीर्यवेपितंपरिभ्रमंतंगिरिमंगपृष्ठतः बिभ्रत्तदावर्त्तनमादिकच्छपोमेनेंगकंडूयनमप्रमेयः १० तथासुरानाविशदासुरेणरूपेणतेषांबलवीर्यमीरयन् उद्दीपयन्देवगणांश्चविष्णुर्दैवेननागेंद्रमबोधरूपः ११ उपर्यगेंद्रंगिरिराडिवान्यआक्रम्यहस्तेनसहस्रबाहुः तस्थौदिविब्रह्मभवेंद्रमुख्यैरभिष्टुवद्भिःसुमनोभिवृष्टः १२ उपर्यधश्चात्मनिनेत्रगोत्रयोः परेणतेआविशतासमेधिताः ममंथुरब्धिंतरसामदोत्कटामहाद्रिणाक्षोभितनक्रचक्रं १२ धरूपेणपरेणहरिणा क्षोभितं

नक्राणांचक्रंसमूहोयस्मिन् १२

दवाग्निनादग्धाः

दृशश्च मुखानि च श्वासाश्च अहींद्रस्य साहस्रं अपरिमिताः कठोरा ये दृगादयः ते
भ्यो निर्गताभ्यां अग्निधूमाभ्यामाहतं वर्चो येषां ते सरलाः द्रुमविशेषाः १४ देवांस्तु भ

अहींद्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमा हतवर्चसोऽसुराः पौलोमकालेयबली
ल्वलादयोदवाग्निदग्धाः सरलाइवाभवन् १४ देवांश्चतच्छ्वासशिखाहतप्रभान्धू
म्रांबरस्रग्वरकंचुकाननान् समभ्यवर्षन्भगवद्वशाघनाववुः समुद्रोर्म्युपगूढवा
यवः १५ मथ्यमानात्तथासिंधोर्देवासुरवरूथपैः यदासुधानजायेत निर्ममंथा
जितःस्वयं १६

गवद्वशाः घनाः समभ्यवर्षन् समुद्रोर्मिभिरुपगूढाः स्पृष्टाः वाय
वश्च शीतलाः ववुः वांति स्म कथंभूतान् तस्याहींद्रस्य श्वासशिखाभिर्हता प्रभा ये
षां धूम्राण्यंबरादीनि येषां तान् १५ १६

धृतोऽद्रिर्येनसधृताद्रिः भगवान्परमपुरुषोऽनंतरमशोभतेत्यन्वयः कथंभूतः
कनकपरिधिः पीतवासाः कर्णयोर्विद्योतमानाविद्युत्कुंडललक्षणायस्यसत

मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्निभ्राजद्विलुलि
तकचः स्रग्धरोरक्तनेत्रः जैत्रैर्दोर्भिर्जगदभयदैर्दंदशूकंगृहीत्वामथ्नन्म
थ्नाप्रतिगिरिरिवाशोभताथोधृताद्रिः १७ निर्मथ्यमानादुदधेरभूद्विषंमहो
ल्वणंहालहलाह्वमग्रतः संभ्रांतमीनोन्मकराहिकच्छपात् तिमिद्विपग्रा
हतिमिंगिलाकुलात् १८

थाम्नाधिभ्राजंतोविलुलिताःकचायस्यसतथा जैत्रैः

रि

गृहीत्वा किं भूतैर्दोर्भिर्जगद् भयदैः उत्क्षिप्ते   भगवान् शंभुः प्रभो

जिष्णुभिर्दोर्भिर्दंदंस्यूकंसपर्पंप्रतिगिरिः प्रतिद्वंद्वीपर्वतः १७ हालाहलमिस्याह्वानामयस्य संभ्रान्ताः मीनाः यस्मिन् उद्धताः मकरादयश्च यस्मिन् तिम्याभिर्दिराकुलाश्च न द्विषं अप्रतिअप्रतिमं प्रतिक्रियाशून्यमितिवा १८ तत्कृतः उग्रोवेगोयस्य तदेवाह

तदुग्रवेगं दिशि दिश्युपर्यधोविसर्पदुत्सर्पदसह्यवीर्यं भीताः प्रजाः दुद्रुवुरंग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवं १९ विलोक्य तं देववरं त्रिलोक्या भवाय देव्या भिमतं मुनीनां आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः २०

दिशिदिशीति यद्वा उग्राः वेगाः रो मांच स्वेदादयो यस्मात् अतएव असह्यवीर्यं विलोक्य भीताः अन्येन केनाप्यरक्ष्यमाणाः सदाशिवं शरणं दुद्रुवुः जग्मुः १९ त्रिलोक्याः उद्भवाय देव्या सह अद्रौ कैलासे आसीनं तथापि मुनीनां अभिमतं मान्यं तेषां

निर्गुणं सगुणं चैव शिवं हरिपराक्रमैः स्तुवंतस्त्व प्रजेशानानामन्यंतां नरंतयोः २१
२२ नन्वेवं भवतो विष्णुरिति प्रसिद्धं तत्राहुः गुणमय्येति अस्य जगतो यदा सर्गा
दीन् धत्से तदा हे भूमन् स्वदृक् स्वतः सिद्धज्ञानस्त्वं ब्रह्मादिसंज्ञां धत्से २३ तत्र हे

प्रजापतय ऊचुः देवदेव महादेव भूतात्मन् भूतभावन त्राहि नः शरणापन्नान्
त्रैलोक्यदहनाद्विषात् २१ त्वमेकः सर्वजगत ईश्वरो बंधमोक्षयोः तं त्वामर्चंति कु
शलाः प्रपन्नार्तिहरं गुरुं २२ गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान् विभो
धत्से यदा स्वदृग्भूमन् ब्रह्मविष्णुशिवाभिधां २३ त्वं ब्रह्म परमं गुह्यं सदसद्भावभा
वनः नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः २४

गुः ब्रह्मेति सदसतोर्भावान् दे

वतिर्यगादिरूपान्भावयतीतितथा स्रज्यंतुतद्व्यतिरिक्तंनास्तीत्याहुः आत्मैवत्वंनाना
शक्तिभिर्जगद्रूपेणाभातः यस्मादीश्वरः २४ स्वतःसिद्धज्ञानत्वमुपपादयंतःजगदात्म
नाअभानप्रकारमाहुः त्वंशब्दस्यवेदस्ययोनिः अतःस्वतःसिद्धज्ञानस्त्वं जगदादि
महत्तत्वं आत्माचअहंकारः कथंभूतःप्राणेंद्रियद्रव्याणांकारणभूताःगुणायस्यारा

त्वंशब्दयोनिर्जगदादिरात्माप्राणेंद्रियद्रव्यगुणःस्वभावः कालःक्रतुःसत्यमृतंचध
र्मःस्त्वय्यपदंयत्रिवृदामनंति २५

जसादिस्त्रिविधस्त्यर्थः स्वभावादयस्त्वत्वमेव क्रतुः
संकल्पःसत्यमृतंचेतियोधर्मःसत्वं महदादिरूपत्वेहेतुः त्रिवृत्त्रिगुणात्मकंयदक्ष
रंप्रधानंत्वयिविद्वांसःश्रयंतदामनंति यद्वा एवंभूतेत्वयि त्रिवृदक्षरंप्रणवंप्रकाशकमाहु
रित्यर्थः २५

अखिलदेवतात्मा अग्निः सर्वदेवतात्मा इति श्रुतेः सोऽग्निस्ते मुखं हे लोकभव द्वितीयां
तेषु विदुरित्यस्य संबंधः २६ परे अवरे च ये आत्मानो जीवास्तेषामाश्रयणमाश्रयस्त

अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजं कालं गतिं
तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशं २६ नाभिर्नभस्ते श्व
सनं नभस्वान्सूर्यश्च चक्षूंषि जलं स्मरेतः परावरात्माश्रयणं तवा
त्मा सोमो मनो द्यौर्भगवन्शिरस्ते २७ कुक्षिः समुद्रा गिरयोऽस्थिसंघा
रोमाणि सर्वौषधिवीरुधस्ते छंदांसि साक्षात्तव सप्त धातवस्त्रयीमया
त्मन्हृदयं सर्वधर्मः २८

वात्माहंकारः २७ त्रयीमयात्मन् वेदत्रयमूर्ते २८

पंचोपनिषदः तत्पुरुषाघोरसद्योजातवामदेवेशानरूपामंत्राः येर्मुखैरष्टोत्तरत्रिंशन्मं
त्राणां वर्गः तेषामेव मंत्राणां पदच्छेदेनाष्टोत्तरशतानि कलात्मकामंत्राइत्यर्थः अवस्थितिः
उपरतावस्था २८ अधर्मस्योर्मिषु दंभलोभादिषु येरूर्मिभिर्विसर्गः प्रतिसर्गः संहारःय

च्छायात्वधर्मोर्मिषु येर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि सांख्यात्मनः शास्त्रकृत्तस्तवे
क्षा छंदोमयो देवऋषिः पुराणः २९ मुखानि पंचोपनिषदस्तवेशाये स्त्रिंशदष्टोत्तरमं
त्रवर्गः यत्तच्छिवाख्यं परमार्थतत्वं देवस्वयंज्योतिरवस्थितिस्ते २९

द्वा येः सत्वादिभिर्विविधः सर्गः तानि नेत्रत्रयं हे देव छंदोमयो ऋषिर्वेदः सतवेक्षाईक्ष
णं साक्षान्मनुरितिपाठे मनुर्वेदः तमेवाह छंदोमय इति ३० श्रीरामचंद्रायपरमा०

हेगिरित्रतेपरंज्योतिरखिलानांलोकपालादीनांगम्यंनभवति कुतः यत्ररजआदि नास्ति किंतत्ज्योतिः यन्निरस्तभेदंब्रह्म ११ कामस्य अध्वरस्यदक्षयज्ञस्य त्रिपुरा दयस्यये अनेक भूतद्रुहस्तान्क्षपयतः संहरतस्तेतत्कर्मस्तुतयेनभवति अल्पमेतदि

नतेगिरित्राखिललोकपालविरिंच्यवैकुंठसुरेंद्रगम्यं ज्योतिः परंयत्ररजस्तमश्चस त्वंनयद्ब्रह्मनिरस्तभेदं ११ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतःस्तुत येनतत्ते यस्त्वंतकालइदमात्मकृतंस्वनेत्रवह्निस्फुलिंगशिखयाभसितंनवेद १२

त्यर्थः गरभक्षणस्यावश्यंभावित्वेनसिद्धवन्निर्देशः स्तुतयेअलंनभवतीत्यत्रहेतुः यस्तुभवान्स्वनेत्रवह्निस्फुलिंगस्याशिखयाइदंजगत्भसितंभस्मसात्कृतंनवेद

[illegible] ३२

तदेवंनित्यंपरानुग्रहेव्यग्रंत्वांयेनिंदंतितेऽतिमूर्खाइत्याहुः येतुउमयासहचरंतंतस्यां
नितरांरतंकामिनंकत्थंतंप्रलपंतंतथाश्मशानेचरंतंउग्रंक्रूरंपरुषंचहिंस्रंकत्थंते॥
कथंभूतआत्मारामाश्चतेगुरवोविश्वहितोपदेशारस्तैर्हृदिचिंतितमंघ्रिद्वंद्वंयस्य

येत्वा त्मरामगुरुभिर्हृदिचिंतितांघ्रिद्वंद्वंचरंतमुमयातपसाभितप्तं क
त्थंतउग्रपरुषंनिरतंश्मशानेतेनूनमूतिमविदंस्तवहात लज्जाः ३३

तथाभूतमपितपसाऽभितप्तमपितेनूनंतवोतिमविदन्निति काकुः त्वल्लीलांनै
वविदुरित्यर्थः अतोहातलज्जाः त्यक्तत्रपाः कथमात्मारामैः सेवितचरणयुगल
स्यकामित्वसंभवः कथंवातपसाभितप्तस्यशांतस्योग्रत्वंपरुषत्वंवासंभवतीत्य
विचार्यैवप्रलापादित्यर्थः ३३

आस्तांतावन्निंदकानांवार्त्तामहांतोपितवतत्वंनजानंतीत्याहुः तस्मात्तवस्वरूपस्य
गमनेज्ञानेब्रह्मादयोपिनसमर्थाःसंस्तवनेतुकुतःशक्ताःस्युः तत्रवयंकथंप्रभवाम

ततस्यतेसदसतोःपरतःपरस्यनांजःस्वरूपगमनेप्रभवंतिभूम्नः
ब्रह्मादयःकिमुनसंस्तवनेवयंतुतत्सर्गसर्गविषयाअपिशक्तिमा
त्रं ३४ एतत्परंप्रपश्यामोनपरंतेमहेश्वर मडनायहिलोकस्यव्य
क्तिस्तेऽव्यक्तकर्मणः ३५

यतस्तेषांसर्गेअस्यंतावा चीनाः तथापियदेतत्स्तवनं
एतदात्मशक्तिपरिमितमात्रमित्यर्थः ३४ तदेवाहुः एतत्परमिति नपरंरूपं तथापित्वद्द
र्शनाहेवक्लृतार्थावयमित्याहुः मडनायहीति ३५

३६ मत्प्रभावमविचार्यविषपानेप्रवृत्तांमांकथंविदियंप्रियावारयेदितिशंकयातामनु
ज्ञापयन्नाह अहोबतेतिसार्द्धैश्चतुर्भिः वैशसंदुःखं ३७ प्राणपरीप्सूनांप्राणरक्ष

श्रीशुकउ० तद्वीक्ष्यव्यसनंतासांकृपयाभृशपीडितः सर्वभूतसुहृद्देवइदमाह
सतींशिवः ३६ अहोबतभवान्येतत्प्रजानांपश्यवैशसं क्षीरोदमथनोद्भूतात्
कालकूटादुपस्थितं ३७ आसांप्राणपरीप्सूनांविधेयमभयंहिमे एतावान्हिप्र
भोरर्थोयद्दीनपरिपालनं ३८ प्राणैःस्वैःप्राणिनःपांतिसाधवःक्षणभंगुरैः बद्धवै
रेषुभूतेषुमोहितेष्वात्ममायया ३९

णेच्छूनां मेमया प्रभोःसमर्थस्य अर्थःका
र्यं ३८ किंच बद्धवैरेषुभूतेषुपरस्परंजिघांसत्सु ३९

कृपयतः कृपांकुर्वतःपुंसः ४० मेमत्तः स्वस्तिः शोभनासत्ता सुखेनजीवितमस्ति

पुंसःकृपयतोभद्रेसर्वात्माप्रीयतेहरिः प्रीतेहरौभगवतिप्रीतो
हंसचराचरः ४० तस्मादिदंगरंभुंजेप्रजानांस्वस्तिरस्तुमे एवमा
मंत्र्यभगवान्भवानींविश्वभावनः ४१ तद्विषंजग्धुमारेभेप्रभा
वज्ञान्वमोदत ततःकरतलीकृत्यव्यापिहालाहलंविषं ४२ अभ
क्षयन्महादेवःकृपयाभूतभावनः तस्यापिदर्शयामासस्ववीर्यंज
लकल्मषः ४३ यच्चकारगलेनीलंतच्चसाधोर्विभूषणं ४४

सर्थः ४१ जग्धुंअत्तुं करतलीकृत्यकरतलपरिमितमात्रंकृत्वा ४२ जलकल्मषः
जलदोषोविषं ४३ यस्मात्तंगलेनीलंचकारसाधोः कृपालोः ४४

४५ ४६ प्रस्कन्नंगलितं अपरेच्चयेसविषाःतेपिजगृहुः अनेनविषस्यतीव्रतो
क्ता ४७ इतिश्रीभागवतेम॰ अ॰ टीकायांसप्तमोध्यायः ७ अष्टमेमथ्यमाने॰

तप्यंतेलोकतापेनसाधवःप्रायशोजनाः परमाराधनंतद्धिपुरुषस्याखिलात्म
नः ४४ निशाम्यकर्मतच्छंभोर्देवदेवस्यमीढुषः प्रजादाक्षायणीब्रह्मावैकुंठश्च
शशंसिरे ४५ प्रस्कन्नंपिबतःपाणेर्यत्किंचिज्जगृहुःस्मतत् वृश्चिकाहिविषौष
ध्योदंदशूकाश्चयेपरे ४७ इतिश्रीभागवतेम॰ अष्टम॰ अमृतमथनेसप्तमोध्या
यः ७ शुकउ॰ पीतेगरेवृषांकेणप्रीतास्तेऽमरदानवाः ममंथुस्तरसासिंधुंहविर्धा
नीततोऽभवत् १
धौलक्ष्म्याविष्णोवक्षःसुरैः ध॰ न्वन्तरेर्हृतेसोमेमोहिन्युङ्कवर्इयंते १
हविर्धानीसुरभिः १

देवयानस्यब्रह्मलोकमार्गप्रापकस्ययज्ञस्यसंबंधिनोहविषे २ ईश्वराशिक्षयाप्रा
गेवकृतया २ भगवतोयः श्वेताद्रिः कैलासस्तस्यमहिमहिमानंदंतैः शिखरतुल्यै

तामग्निहोत्रीमृषयोजगृहुर्ब्रह्मवादिनः यज्ञस्यदेवयानस्यमेध्यायहविषेनृप २
ततउच्चैः श्रवानामहयोभूच्चंद्रपांडुरः तस्मिन्बलिः स्पृहांचक्रेनेंद्रईश्वरशिक्षया
३ ततऐरावतोनामवारणेंद्रोविनिर्गतः दंतैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतोमहिं ४
कौस्तुभाख्यमभूद्रत्नंपद्मरागोमहोदधेः तस्मिन्मणौस्पृहांचक्रेवक्षोलंकरणेह
रिः ५ ततोभवत्पारिजातः सुरलोकविभूषणं पूरयत्यर्थिनोयोर्थैः शश्वद्भुविय
थाभवान् ६

हरन्नुच्चंद्रवत्पांडुरस्यानुषंगः ४ ५ ६ ७

वल्गुभिर्गत्यादिभिः स्वर्गिणांरतिकर्त्र्यः ७ सुदामापर्वतः तत्रैकस्यांदिशिजातासौ
दामनी स्फटिकादिमयगिरिशृंगेधिकंविस्फुरंतीविद्युदिवकांत्यादिशोरंजयंती

ततश्चाप्सरसोजातानिष्ककंठ्यःसुवाससः रमण्यःस्वर्गिणांव
ल्गुगतिलीलावलोकनैः ७ ततश्चाविरभूत्साक्षाच्छ्रीरमाभग
वत्परा रंजयंतीदिशःकांत्याविद्युत्सौदामनीयथा ८ तस्यां
चक्रुःस्पृहांसर्वेससुरासुरमानवाः रूपौदार्यवयोवर्णमहि
मास्ति सचेतसः ८

श्रीःसंपत्साक्षान्मूर्तिधारिणीसतीसैवभगवत्पराऽरमाविरभूदित्यर्थः ८ तस्यारू

[illegible]

भगवद्भस्मसिस्थितया विलोकितानां देवानां यथापूर्वं सर्वसंपत्प्राप्तिमसुराणां च त
द्विपर्ययं वक्तुं अभिषेकादिमहोत्सवपूर्वकं ब्रह्मादिपरिहारेण भगवत्प्राप्तिप्रकारमाह

तस्यास्त्वासनमानिन्ये महेंद्रो महदद्भुतं मूर्तिमत्यः सरिच्छ्रेष्ठा हेमकुंभैर्जलं शुचि १
आभिषेचनिकास्तस्मिन्नाहरन्सकलौषधीः गावः पंच पवित्राणि वसंतो मधुमाधवौ ॰
ऋषयः कल्पयांचक्रुरभिषेकं यथाविधि जगुर्भद्राणि गंधर्वा [illegible] श्चनन्तुर्जगुः ॥
मेघा मृदंगपणवमुरजानकगोमुखान् व्यनादयन् शंखवेणुवीणास्तुमुलनिस्वना

तस्या आसनमित्यादिना अथासीद्दारुणोत्सवः प्राक्तनेन यथेन १ आभिषेचनिकाः
अभिषेकोदिताः पंच पवित्राणि पंचगव्यानि मधुमाधवौ चैत्रवैशाखभवं फलपु

त्य

चि

ष्मादि पाठांतरेपिद्वंद्वैक्येस एवार्थः मधुमासेभवंमध्विनिवा १० अभिषेकंअभि
षेकोचितंविधिं नद्यः नदानांस्त्रियः ११ शंखवेणुवीणाध्वन्यनादयन् तुमुलोनि
ततोऽभिषिषिचुर्देवींश्रियंपद्मकरांसतीं दिग्गिभाःपूर्णकलशैः सूक्तवाक्यैर्द्विजेरि
तैः १३ समुद्रः पीतकौशेयवाससीसमुपाहरत् वरुणः स्रजंवैजयंतींमधुनामत्त
षट्पदां १४ भूषणानिविचित्राणिविश्वकर्माप्रजापतिः हारंसरस्वतीपद्ममजोनागा
श्चकुंडले १५ ततः कृतस्वस्त्ययनोत्पलस्रजंनदद्द्विरेफांपरिगृह्यपाणिना च
चालवक्त्रंसुकपोलकुंडलंसव्रीडहासंदधतीसुशोभनं १६ स्तनद्वयंचातिकृशोद
रीसमंनिरंतरंचंदनकुंकुमोक्षितं ततस्ततोनूपुरवल्गुसिंजितैर्विसर्पतीहेम
लतेवसाबभौ १७

स्नपनीयेषां तान् मरंगादीन् १२ १६ १७

सूक्तवाक्यैर्वैदमंत्रैः १३ मधुनामकरंदेन १४

सरस्वती मुक्ताहारं अजो ब्रह्मा पद्मां मालां लक्ष्मीः कृतस्वस्त्ययनाब्जमालां विष्णुस्तरेणान्व
हेला: १६

आलोकयंती

पदंआश्रयंध्रुवंनित्यंअव्यभिचारिणोनित्याःसंतोगुणाःयस्मिन्तं नान्वविंदतकवि
त्कस्यचिद्दोषस्यसद्भावात् १८ तदेवाह नूनमितित्रिभिः मन्युनिर्जयोनास्तिदुर्वासंप्र

विलोकयंतीनिरवद्यमात्मनःपदंध्रुवंचाव्यभिचारिसद्गुणं गंधर्वयक्षासुरसिद्धचा
रणत्रैविष्टपेयादिषुनान्वविंदत १८ नूनंतपोयस्यनमन्युनिर्जयोज्ञानंक्वचित्तच्चन
संगवर्जितं कश्चिन्महांस्तस्यनकामनिर्जयःसईश्वरःकिंपरतोव्यपाश्रयः १९ धर्मः
क्वचित्तत्रनभूतसौहृदंत्यागःक्वचित्तस्यनमुक्तिकारणं वीर्यंनपुंसोस्त्यजवेगनिष्कृतं

नहिद्वितीयोगुणसंगवर्जितः २०

भ्रातिषु गुरुसुक्रादिषुसंगव र्जितंज्ञानंनास्ति महत्वे
पिब्रह्मसोमादौनकामनिर्जयःपरतोव्यपाश्रयःपरापेक्षइंद्रादिःसकिमीश्वरः १९ नभूत
सौहृदंपरशुरामादिषु नमुक्तिकारणंत्यागःशिबिप्रभृतिषु पुंसःकार्त्तवीर्यादेर्वीर्यमस्ति

अजवेगनिष्कृतंकालवेगेनपरिल्हतंतुनभवति गुणसंगवर्जिनः सनकादिः द्वितीयःसम
मवरोनहिसमाधिनिष्ठत्वात् २० चिरायुष्यपिमार्कंडेयादौशीलंमंगलंनास्ति इंद्रिय
दमनशीलत्वात् कश्चित् तदप्यास्तिहिरण्यकशिपुप्रभृतौ आयुषस्तुस्थैर्येनवेयंद
र्शितं भगवद्द्वेषेणाकस्मादेवमृत्युसंभवात् यत्रकुत्रचश्रीरुद्रमार्कंडेयादिवत् इंदि

कश्चिच्चिरायुर्नहिशीलमंगलंकश्चित्तदप्यास्तिनवेद्यमायुषः यत्रोभयंकुत्रचसोऽप्य
मंगलः सुमंगलः कश्चनकांक्षतेहिमां २१
यद्दमनाद्यभावाच्छीलंमंगलंचायुर्नि
श्चयश्चेत्तुभयमस्ति नचान्यः पूर्वोक्तः कश्चिद्दोषः तथापिसोऽप्यमंगलः श्मशान
वासाद्यमंगलचेष्टितः श्रीमुकुंदलक्ष्मीकृत्याह कश्चेति कश्चित्सुमंगलः निरवद्यश्च
सन्तुमांनहिकांक्षतेआत्मारामत्वात् २१ ७

एवंविमत्स्यरमानिरपेक्षमपिमुकुंदमेववरंवव्रेत किं अव्यभिचारिभिः सद्भिर्धर्मज्ञा
नादिभिर्गुणैःनिजैकाश्रयतयाचनैरपेक्ष्येणवरंसर्वोत्तमं तत्रहेतुः अगुणाश्रयंप्र
कृतिगुणातीतं पाठांतरेऽप्ययमेवार्थः अतएवस्वस्यईप्सितं किंचसर्वैर्गुणैरणिमादि

एवंविमृश्याव्यभिचारिसद्गुणैर्वरंनिजैकाश्रयतयाऽगुणाश्रयं ॥ व
व्रेवरंसर्वगुणैरपेक्षितंरमामुकुंदंनिरपेक्षमीप्सितं २२ ६

भिरपेक्षितंवृतं अयंभावः यद्यपिस्वयमात्मारामत्वेनान्यनिरपेक्षः तथाऽप्याश्रि
ताअणिमादिसिद्धीर्यथानोपेक्षतेतथामामपिनोपेक्षेत तावतैवतत्सेवयाऽहंकृ
तार्थास्यांकिमन्यैः प्राकृतैरितितमेववृतवतीति २२ श्रीरामायनमः २२ ५

तदेवाह तस्यां सदेशेऽकमनीयां नवकंजमालां निधाय तदनु ग्रहं प्रतीक्षमाणात्तूष्णीं तस्य निकटे तस्थौ कथंभूतां मालांमायंतो येमधुव्रताः तेषां वरूथस्य गिरा प्रघु

तस्यांसदेशाउशतींनवकंजमालांमायन्म
धुव्रतवरूथगिरोपघुष्टां तस्थौनिधायनि
कटेतडरःस्वधामसव्रीडहासविकसन्नय
नेनपाता २३

ष्टां नादितां कथंभूता श्रीः सव्रीड हासे नविकसत्पन्नयनं तेन तस्य उरः स्वधाम यातासती क्षेत्रे प्रतीक्षमाणा तस्थावित्यर्थः २३ श्रीकृष्णपरमात्मने

भगवानपित्रैलोक्याभिवृद्धयेस्ववक्षस्तस्याः स्थानंददाविस्याह तस्यामिति विशिष्टा
भूतयोविभवायस्याः तस्यास्त्रिजगतोजनन्याःश्रियः परमंसुस्थिरं ऐधयन्तअवर्धय

तस्यांश्रियास्त्रिजगतोजनकोजनन्यावक्षोनिवासमकरोत्परमंविभूतेः
श्रीःस्वाःप्रजाःसकरुणेननिरीक्षणेनयत्रास्थितैधयतसाधिपतींस्त्रि
लोकान् २४ शंखतूर्यमृदंगानांवादित्राणांपृथुकुःस्वनः देवानुगानांस
स्त्रीणांनृत्यतांगायतामभूत् २५ ब्रह्मरुद्रांगिरोमुख्याःसर्वेविश्वसृजो
विभुं ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैःपुष्पवर्षिणः २६

त् २४ २५ तल्लिंगैःविष्णुप्रतिपादकैः अवितथैर्यथार्थैः २६ श्रीगोविंदायनमोनमः

२७ २८ वारुणीवरुणदेवत्यंयदन्नंतन्मयीसुरा २९ ३० दीर्घौपीवरौदोर्दंडौयस्य

श्रिया विलोकितादेवाः सप्रजापतयः प्रजाः शीलादिगुणसंपन्नालेभिरेनिर्वृतिंप
रां २७ निःसत्वाश्लोलुपाराजन्निरुद्योगागतत्रपाः यदाचोपेक्षितालक्ष्म्याबभूवुर्दैत्यदा
नवाः २८ अथासीद्वारुणीदेवीकन्याकमललोचना असुराजगृहुस्तांवैहरेरनुमतेन
ते २९ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः उदतिष्ठन्महाराजपुरुषः परमाद्‌भु
तः ३० दीर्घपीवरदोर्दंडः कंबुग्रीवोरुणेक्षणः श्यामलस्तरुणः स्रग्वीसर्वाभरणभू
षितः ३१ पीतवासामहोरस्कः सुमृष्टमणिकुंडलः स्निग्धकुंचितकेशांतः सुभगः सिंह

विक्रमः ३२

कंबुग्रीवः शंखवनाभिरिवत्रिरेखां कितायग्रीवायस्य ३१ स्निग्धाः कुंचिताः
केशानामंतोयस्य ३२

इज्यभाक् यज्ञभागभोक्ता ३३ अमृतेन आभृतं पूर्णं ३४ ३५ मिथः दैत्यानां परस्परं कलहोत्पादनेन योगमायया च मोहिन्या वोऽर्थं साधयिष्यामि अतो मा खिद्यतेत्या

सवै भगवतः साक्षाद्विष्णोरंशांशसंभवः धन्वंतरिरिति ख्यात आयुर्वेददृगिज्यभाक् ३३ तमालोक्यासुराः सर्वे कलशं चामृताभृतं लिप्संतः सर्ववस्तूनि कलशं तरसाऽहरन् ३४ नीयमानेऽसुरैस्तस्मिन् कलशेऽमृतभाजने विषण्णमनसो देवा हरिं शरणमाययुः ३५ इति तद्दैन्यमालोक्य भगवान् भृत्यकामकृत् मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ३६ मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसां अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ३७

हेतिशेषः ३६ तदेवाह मिथ इति तर्षः कामः तद्युक्तानि चेतांसि येषां इत्येवं समबलानां कलिरभूत् ३७

दुर्बलानां त्वाक्रोशप्रकारमाह देवा इति द्वाभ्यां ये देवास्तुल्येनायासेन हेतवः साधकाः तुल्य आयासो हेतुश्च धनादिर्येषामिति वा सत्रयागे यथा सर्वेषां समं फलं तद्वत् तथा च श्रुतिः ऋद्धिकामाः सत्रमासीरन्निति ये यजमानास्त ऋत्विज इति च ३९ ३९।४०

देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ३९ इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ४० एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः योषिद्रूपमनिर्देश्यं दधार परमाद्भुतं ४० प्रेक्षणीयोत्पलश्यामं सर्वावयवसुन्दरं समानकर्णाभरणं सुकपोलोन्नसाननं ४१

तद्रूपं वर्णयति पञ्चभिः प्रेक्षणीयमुत्पलमिव श्यामं सर्वेष्ववयवेषु सुन्दरं समानयोः कर्णयोराभरणे यस्मिन् सुकपोलं च तदुन्नसं नासिकं चाननं यस्मिन् ४१

नवयौवनेननिर्वृत्तयोः स्तनयोर्भारेणचलत्कृशमुदरंयस्मिन् ४२ सुष्ठुग्रीवायस्मिन्
कंठेआभरणंयस्मिन् तत्रतत्र शोभनाग्रीवायेनतत्कंठाभरणंयस्मिन्नितिवा सु

नवयौवननिर्वृत्तस्तनभारकृशोदरं मुखामोदानुरक्तालिझंकारोद्विग्नलोचनं ४२
बिभ्रत्स्वकेशभारेणमालामुत्फुल्लमल्लिकां सुग्रीवकंठाभरणंसुभुजांगदभूषितं
४३ विरजांबरसंवीतनितंबद्वीपशोभया कांच्याप्रविलसद्वल्गुचलच्चरणनूपुरं
४४ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः दैत्ययूथपचेतस्सुकाममुद्दीपयन्मुहुः
४५ इतिश्रीभागवते० अ० भगवन्मायोपलंभनंनामअ० ८

भुजयोरंगदाभ्यांभूषि
तं ४३ विरजांबरेणसंवीतोनितंबएवद्वीपः विशालत्वात्तत्रशोभायस्याः तयाकांच्या
प्रकर्षेणविलसत्वल्गुयथाभवत्येवंचलतोश्चरणयोर्नूपुरेयस्मिन् ४४ सव्रीडेनस्मि

तेनसहविक्षिप्ताकंपितायाम्रः तस्याविलासेनसहयान्यवलोकितानितैः दैत्ययूथ
पानांचेतस्सुमुहुर्मुहुः काममुद्दीपयन् ४५ इतिश्री॰ अ॰ अ॰ ८ नवमेमोहितैर्दै
त्यैरर्पिते ऽमृतभाजने तद्वचनेनदेवेभ्यो ऽमृतंदत्तंनयेर्यंते ११ अहोरूपंसौंदर्यं

श्रु॰ क॰ उ॰ ॥ तेऽन्योन्यतो ऽसुराः पात्रंहरंतस्त्यक्तसौहृदाः क्षिपंतोदस्युधर्माणआयांतीं
ददृशुः स्त्रियं १ अहोरूपमहोधामअहोअस्यानवंवयः इतितेतामभिद्रुत्यपप्रच्छु
र्जातहृच्छयाः २ कात्वंकंजपलाशाक्षिकुतोवाकिंचिकीर्षसि कस्यासिवदवामो

रुमथ्नंतीवमनांसिनः ३

धामद्युतिः इतिवदंतः कात्वमित्यादिपप्रच्छुः २ मथ्नंतीवक्षोभयंतीव ३ ७ ७

मुक्त

कस्यासीत्ययुक्तमस्माभिः यतस्त्वं नकेनचित् भुक्तपूर्वेत्याहुः नेति त्वात्वां अमरादिभि
रस्पृष्टपूर्वांनजानीमइतिन अपितुजानीमएव ४ आस्तामिदं त्वद्दर्शनंतोश्वरेणैवसं

नवयंत्वामरैर्दैत्यैः सिद्धगंधर्वचारणैः नास्पृष्टपूर्वांजानीमोलोकेशेश्वकुतोनराभिः ४
नूनंत्वंविधिनासुभ्रुप्रेषितासिशरीरिणां सर्वेंद्रियमनःप्रीतिंविधातुंसघृणेनकिं ५
सात्वंनःस्पर्धमानानामेकवस्तुनिभामिनि ज्ञातीनांबद्धवैराणांशंविधत्स्वसुमध्यमे
६ वयंकश्यपदायादाभ्रातरःकृतपौरुषाः विभजस्वयथान्यायंनैवभेदोयथाभवेत् ७

पादितमित्याहुः नूनमिति सर्वेंद्रियाणांमनसश्चप्रीतिंविधातुंसघृणेनकिंप्रेषितासिकिं
वायदृच्छयैवागतासि नैवं नूनंप्रेषितैवेत्यर्थः ५६ भेदोविग्रहोयथानभवेत्तथा ७ ७

८ संगताः अनुसृताः ९ हेसुरद्विषः १० भावेनकेनाप्यभिप्रायेणगंभीरंयथाभवत्येवं

इत्युपामंत्रितोदैत्यैर्मायायोषिद्वपुर्हरिः प्रहस्यरुचिरापांगैर्निरीक्षन्निदमब्रवीत् ८
श्रीभगवानु॰ कथंकश्यपदायादाःपुंश्चल्यांमयिसंगताः विश्वासंपंडितोजातुकामि
नीषुनयातिहि ९ सालावृकाणांस्त्रीणांचस्वैरिणीनांसुरद्विषः सख्यान्याहुरनित्या
नित्यंनूत्नंविचिन्वतां १० शुकउ॰ इतितेक्ष्वेलितैस्तस्याआश्वस्तमनसोऽसुराः
जहसुर्भावगंभीरंददुश्चामृतभाजनं ११ ततोगृहीत्वामृतभाजनंहरिर्बभाषईषत्स्मि
तशोभयागिरा यद्यभ्युपेतंक्वचसाध्वसाधुवाकृतंमयावोविभजेसुधामिमां १२

जहसुः ११ ईषात्स्मितेनशोभायस्याःतया मयाकृतंसाधुवाअसाधुवायद्यभ्युपेतंअंगी
कुरुततर्हिविभजे १२

असुरपुंगवाः दैत्यश्रेष्ठाः प्रमाणमियत्तामजानंतः १३ १४ यथोपजोषंयथाप्रीति अ
हतस्यलक्षणं अहतंयंत्रनिर्मुक्तमुक्तंवासः स्वयंभुवा शस्तंतन्मांगलिकेषुतावन्मात्रे

इत्यभिव्याहृतंतस्याआकर्ण्यासुरपुंगवाः अप्रणेमोविदस्तस्यास्त
तथेत्यन्वमंसत १३ अथोपोष्यकृतस्नानाहुत्वाचहविषाऽनलं दत्वा
गोविप्रभूतेभ्यः कृतस्वस्त्ययनाद्विजैः १४ यथोपजोषंवासांसिपरि
धायाहतानिते कुशेषुप्राविशन्सर्वेप्रागग्रेष्वभिभूषिताः १५ ७

गसर्वदा प्रागग्रेषुकुशेषूपविविशुः १५ नमोभगवतेश्रीवासुदेवायनमोनमः ॐ

धूपैरामोदितायां सुरभीकृतायां शालायां १६ अथ तस्यां शालायां हेनरेंद्र सा कलशपाणि
राविवेश कथंभूता मणिबंधादाकनिष्ठं करस्य करभो बहिः करभसदृशो सुवृत्ताव्
रूरुयस्याः सा उशात्कमनीयं दुकूलं यस्मिन् तेन श्रोणीतटेन विशालया श्रोण्या अल

॥७॥ प्राङ्मुखेषूपविष्टेषु सुरेषु दितिजेषु च धूमामोदितशालायां जुष्टायां माल्यदीप
कैः १६ तस्यां नरेंद्र करभोरुलसत् दुकूल श्रोणीतटालसगतिर्मदविह्वलाक्षी साकू
जती कनकनूपुरसिंजितेन कुंभस्तनी कलशपाणिरथाविवेश १७

सामंदागतिर्यस्याः सा पाठांतरे करभसदृशायोरूर्वोर्लसत् दुकूलं यस्याः सा चासौ श्रो
णीतटेनालसगतिश्च मदेन विह्वले अक्षिणी यस्याः १७ नमो भगवते श्रीरामाय ७

तांश्रियःसर्वांसंवीक्ष्यदेवासुराःसंमुमुहुः कथंभूतां कनकमयेकुंडलेयस्याः
साचासौचारुवः कर्णाद्वयोयस्याःसाच विगलितोविस्रस्तःस्तनपट्टिकायाअं
तोयस्याःतां १८ एवंतान्मोहयित्वायत्कृतवान्तदाहत्रिभिः असुराणांसुधा

तांश्रीसर्वांकनककुंडलचारुकर्णनासाकपोलवदनांपरदेवताख्यां संवीक्ष्य
संमुमुहुरुत्स्मितवीक्षणेनदेवासुराविगलितस्तनपट्टिकांतां १८ असुराणां
सुधाहानंसर्पाणामिवदुर्नयं मत्वाज्ञातिन्दहांसानांनतांव्यभजदद्भुतः १९

हानंसर्पाणांक्षीरदानामिवदुर्नयंअन्याय्यंमत्वातांसुधांतेभ्योनव्यभजत् अयं
भावः दैत्यैर्मदीयंसाध्वसाधुवासर्वमनुमतमेव अतोमङ्क्षान्देवानेवसुधांपाय

यिष्यामि किंच तैर्यथान्यायं विभजे सुकृतं न चैते भ्योजातु सेव क्रूरेभ्योदानं न्याय्यं अ
तस्तेभ्यः सुधां न दद्यामिति १९ पंक्तीं पृथक् विविक्ताः कल्पयित्वा विधाय तासु पंक्ति
षु स्वेषु स्वेषु तत्सजातीयेषु तांश्च असुरानपि प्रतारणार्थमेकोपवेशयामास २०

कल्पयित्वा पृथक् पंक्तीरुभयेषां जगत्पतिः तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्ति
षु २० दैत्यान् गृहीतकलशो वंचयन् [illegible]पसंचरैः दूरस्थान् पाययामास जरामृ
त्युहरां सुधां २१ ते पालयंतः समयमसुराः स्वकृतं नृप तूष्णीमासन् कृतस्ने
हाः स्त्रीविवादजुगुप्सया २२

उपसंचरैः बहुमानप्रियवाक्यादिना तानतिक्रम्य।
तिक्रम्य गमनैः दूरस्थानपि देवान् २१ तया कृतः स्नेहो येषु स्त्रिया सह विवादस्य जुगु
सया २२

कृतं अतिप्रणयः स्नेहो यैः प्रणयापायेन कातरा भीताः एतेतावत्कृपणाः पूर्वं किं
चित्पिबंतु यूयंतु धीराः क्षणं प्रतीक्षध्वमित्यादिबहुमानेन च आबद्धाः नियंत्रिताः

तस्यां कृतातिप्रणयाः प्रणयापायकातराः बहुमानेन चाबद्धा नोचुः किंचनविप्रि
यं २३ देवलिंगप्रतिछन्नः स्वर्भानुर्देवसंसदि प्रविष्टः सोममपिबच्चंद्रार्काभ्यां च
सूचितः २४ चक्रेण क्षुरधारेण जहार पिबतः शिरः हरिस्तस्य कबंधस्तु सुधया
प्लावितोऽपतत् २५ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् यस्तु पर्वणि चंद्रा
र्कावभिधावति वैरधीः २६

समयपालनादिभिः षड्भिरेतैः कारणैरप्रियं किंचिद
पि नोचुः किंतु तूष्णीमासन् २३ देवपंक्तौ चंद्रार्कयोर्मध्ये प्रविष्टः सोमममृतमपिब
त् २४ हरिस्तस्य शिरो जहार अप्लावितः असंस्पृष्टः २५ ग्रहं सूर्यादिवद्ग्रहत्वाधि

२७ हरिभक्तानामेवोद्यमः फलतिनान्येषामित्येवमाख्यानतात्पर्यमाह एवमितिस
मादेशादयोयेषांहेतुर्मंदराद्रिः अर्थःसमुद्रेस्त्रिस वीरुधादिविविधःकल्पःफलंकेषांचि

पीतप्रायेऽमृतेदेवैर्भगवान्लोकभावनः पश्यतामसुरेंद्राणां
स्वरूपंजगृहेहरिः २७ एवंसुरासुरगणाःसमदेशकालहेत्व
र्थकर्ममतयोपिफलेविकल्पाः तत्राऽमृतंसुरगणाःफलमं
जसापुर्यत्पादपंकजरजःश्रयणान्नदैत्याः २८

ज्ञातंकेषांचिन्नेतिवैचित्र्यंयेषांतेफलेवैषम्यवंतोबभूवुरित्यर्थः तदेवाह तत्रये
षुयस्यपादपंकजरजःश्रयणाद्देवाअमृतंफलमापुःसएवसेव्यइत्यर्थः यत्तदोर्नि

एतदेवोपपादयतियदिति असुःप्राणःवसुधनं प्राणादिभिर्देहात्मजादिषुन्राभि
र्यद्युज्यते देहाद्यर्थंयत्क्रियतइत्यर्थः तदसत्व्यर्थंभवति कुतः पृथक्त्वात् भेद
श्रयत्वात् शाखानिषेचनवत् तैरेवप्राणादिभिरीश्वरोद्देशेनयत्क्रियते तत्तुसत्
यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषुन्राभिस्तदसत् पृथक्त्वात्।
तैरेवसद्भवतियत्क्रियतेऽपृथक्त्वात्सर्वस्यतद्भवतिमूलनिषेचनंयत् २९
महाफलंभवति कुतः अपृथक्त्वात्ईश्वरस्यसर्वत्रानुगतत्वात् तत्रदृष्टांतः य
तरोर्मूलनिषेचनंतत् यथा सर्वस्यस्कंधशाखादेरपिभवतीति यद्वाल्पफलोपेपं
चम्यो पृथक्त्वं पर्यालोच्यभेददृष्ट्यादेहाद्युद्देशेनयत्क्रियतेतदसत् अपृथक्त्वंपर्या
लोच्येश्वरदृष्ट्यानैरेवतेषुचयत्क्रियतेतत्सद्भवतीति शेषंसमानं २९

इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेटीकायांनवमोध्यायः ९ दशमेमत्सरोद्दीप्तै
रारब्धेतुमृधेसुरैः दैत्यमायाविषण्णेषुदेवेष्वाविर्बभौहरिः १ तदेवममृतावाप्ति

इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेऽमृतपानेनवमोध्यायः
९ ७ श्रीशुकउवाच इतिदानवदैतेयानाविंदन्नमृतंनृप युक्ताः
कर्माणियत्ताश्चवासुदेवपराङ्मुखाः १ साधयित्वाऽमृतंराजन्पा
ययित्वास्वकान्सुरान् पश्यतांसर्वभूतानांययौगरुडवाहनः २

नोभक्तानामितीरितं भक्तमत्सरतःप्राणहानिःपुनरुदीर्यते २ १ २ श्रीराम

३ ४ रणः संग्रामः उदन्वतः समुद्रस्य रोधसि तीरे बभूव ५ अन्योन्यं समासाद्य नि

सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः अमर्ष्यमाणा उत्पेतुर्देवान् प्रत्युद्यतायुधाः २
ततः सुरगणाः सर्वे सुधया पीतयैधिताः प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः
४ तत्र देवासुरो नाम रणः परमदारुणः रोधस्युदन्वतो राजन् तुमुलो लोमहर्षणः ५
तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायु
धैः ६ शंखतूर्यमृदंगानां भेरीडमरुणां महान् हस्त्यश्वरथपत्तीनां नदतां निःस्व
नोऽभवत् ७ रथिनो रथिभिस्तत्र पत्तिभिः सह पत्तयः हया हयैरिभाश्चेभैः समस
ज्जंत संयुगे ८ उष्ट्रैः केचिदिभैः केचिदपरे युयुधुः खरैः केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभि
र्हरिभिर्भटाः ९
जघ्नुः ६ ७ ८ ९

१० ११ १२ चित्रजैर्ध्वजपटादिभिश्च वीराणां मालाभिश्च राजिभिर्देवदानववीराणां
ध्वजिन्यो यादसां मालाभिः सागरा विवरेजतुरिति त्रयाणामन्वयः यादोभिरिति

गृध्रैः कंकैर्बकैरन्यैः श्येनभासैस्तिमिंगिलैः शरभैर्महिषैः खड्गैर्गोवृषैर्गवयारुणैः
१० शिवाभिराखुभिः केचित्कृकलासैः शशैर्नरैः बस्तैरेके कृष्णसारैर्हंसैरन्यैश्च
सूकरैः ११ अन्ये जलस्थलखगैः सत्त्वैर्विकृतविग्रहैः सेनयोरुभयो राजन्विविशु
स्तेऽग्रतोऽग्रतः १२ चित्रध्वजपटै राजन्नातपत्रैः सितामलैः महाधनैर्वज्रदंडै
र्व्यजनैर्बार्हचामरैः १३ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः स्फुरद्भिर्विशदैः
शस्त्रैः सुतरां सूर्यरश्मिभिः १४ वा सितैरमलैरातपत्रैश्च वार्हैश्च चामरैश्च व्यजनैः १३
वातेनोद्धूतैरुत्तरैरुत्तरीयैः उष्णीषैश्च सूर्यरश्मिभिः सुतरां स्फुरद्भिः १४

१५ असुराणांयाचमूः तस्याः पतिः सबलिर्यानमास्थितः १६ १७ उदयेउदयगिरिशि

देवदानववीराणां ध्वजिन्योपांडुनंदन रेजतुर्वीरमालाभिर्यादसामिवसागरौ १५
वैरोचनोबलिः संख्येसोऽसुराणांचमूपतिः यानंवैहायसंनामकाममंगेयनिर्मि
तं १६ सर्वसांग्रामिकोपेतंसर्वाश्चर्यमयंप्रभो अप्रतर्क्यमनिर्देश्यंदृश्यमानमदर्श
नं १७ आस्थितस्तद्विमानाग्र्यंसर्वानीकाधिपैर्वृतः बालव्यजनछत्राग्र्यैरेजेचंद्रइवोदये
१८ तस्यासन्सर्वतोयानैर्यूथानांपतयोऽसुराः नमुचिः शंबरोबाणोविप्रचित्तिरयोमु
खः १९ द्विमूर्धाकालनाभोथप्रहेतिर्हेतिरिल्वलः शकुनिर्भूतसंतापोवज्रदंष्ट्रोविरो
चनः २०

खरोस्थितः चंद्रइवविरेजइतित्रयाणामन्वयः १८ २०

स्रवंति मस्रवणानि यास्मिन्निति मदधारासादृश्यं २५ नानावाहनादीनि येषां

हयग्रीवः शंकुशिराः कपिलोमेघदुंदुभिः तारकश्चक्रदृक्शुंभो निशुंभो जंभउत्कलः २१ अरिष्टोरिष्टनेमिश्च मयश्च त्रिपुराधिपः अन्ये पौलोमकालेया निवातकवचादयः २२ अलब्धभागाः सोमस्य केवलं क्लेशभागिनः सर्व एते रणमुखे बहुशो निर्जितामराः २३ सिंहनादं विमुंचंतः शंखान्दध्मुर्महारवान् दृष्ट्वा सपत्नानुत्सिक्तान्बलभित्कुपितो भृशं २४ ऐरावतं दिक्करिणमारूढः शुशुभे स्वराट् यथा स्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः २५ तस्यासन्सर्वतो देवा नानावाहध्वजायुधाः लोकपालाः सहगणैर्वाय्वग्निवरुणादयः २६

२६ श्रीरामचंद्राय ७

तेदेवाऽसुराश्च

मिथोयुयुधुः २७ द्वंद्वान्येवाह युयोधेतिसप्तभिः अस्यतआस्यतत्र्ययुध्यतेत्सर्य्यः २८

तेऽन्योन्यमभिसंरब्धाक्षिपंतोमर्मभिर्मिथः आह्वयंतोविशंतोग्रेयु
युधुर्द्वंद्वयोधिनः २७ युयोधबलिरिंद्रेणतारकेणगुहोऽस्यत वरुणोहे
तिनाऽयुध्यन्मित्रोराजन्प्रहेतिना २८ यमस्तुकालनाभेनविश्वकर्मामं
येनवै शंबरोयुयुधेत्वष्ट्रासवित्रातुविरोचनः २९ अपराजितेननमुचि
रश्विनौवृषपर्वणा सूर्योबलिसुतैर्देवोबाणज्येष्ठैःशतेनच ३० राहुणाच
तथासोमःपुलोम्नायुयुधेऽनिलः निशुंभशुंभयोर्देवीभद्रकालीतरस्वि
नी ३१

२९ सूर्योदेवएकएवशतेनबलिसुतैः बाणोज्येष्ठोयेषांतैः ३० निशुंभशुंभाभ्यांदेवी ३१

३२ ३३ ३४ ३५ ३६

वृषाकपिस्तुजंभेनमहिषेणविभावसुः इल्वलःसहवातापिर्बलपुत्रैररिंदम ३२
कामदेवेनउर्मर्षउत्कलोमात्यभिःसह बृहस्पतिस्तूशानसानरकेणत्रानेश्वरः ३३
मरुतोनिवातकवचैः कालेयैर्वसवोमराः विश्वेदेवास्तुपौलोमैरुद्राःक्रोधवशैःसह
तएवमाज्ञावसुराःसुरेंद्रा द्वंद्वेनसंहत्यचयुध्यमानाः अन्योन्यमासाद्यनिजघ्नुरोज
साजिगीषवस्तीक्ष्णशरासितोमरैः ३५ भुसुंडिभिश्चक्रगदर्ष्टिपट्टिशैः शतघ्नुल्मु
कैर्मा सपरस्वधैरपि निस्त्रिंशभल्लैःपरिघैःसमुद्गरैःसभिंडिपालैश्चशिरांसिचिच्छि
दुः ३६

आरोहंतीत्यारोहाः तैः सहिता अन्ये च वाहाः एवं तु केवलं गजादय उक्ताः कथंभूताः नि
कृत्ताः बाह्वादयो येषां छिन्नानि ध्वजादीनि येषां ३७ तेषां देवादीनां पदातीनां रथानां गो
श्च चूर्णिता दारा योधना द्रुणम् मेरुस्थितो रेणुर्दिशः खं द्युमणिं च सूर्यं छादयंस्तदैव स्वा

गजास्तुरंगाः सरथाः पदातयः सारोहवाहा विविधा विखंडिताः निकृत्तबाहूरुशिरो
धरांघ्रयः छिन्नध्वजेष्वासतनुत्रभूषणाः ३७ तेषां पदातानरथांगचूर्णितादायोधना
दुल्बणउत्थितस्तदा रेणुर्दिशः खं द्युमणिं च छादयन् न्यवर्त्ततासृक्स्रुतिभिः परिप्लुता

देर्न्यवर्त्तत कथंभूतात् असृक्स्रुतिभिः रक्तस्रवणैः परिप्लुतात् सिक्तात् यद्वा परिप्लु
वनाद्धेतोर्न्यवर्त्तत भावे क्तः रक्तधाराणां तत्पर्यंतमुच्छलनादित्यर्थः प्रथमांतपाठे रेणो

र्विशेषणं ३८

शिरोभिर्महाभुजैश्चकरभसदृशैरूरुभिश्चसारणमृः प्रकर्षेणास्तृतासतीबभौ
कथंभूतैः शिरोभिः उद्धूतानिउत्पतितानिकिरीटानिकुंडलानिचयेभ्यः तैः संरंभयुक्ता

शिरोभिरुद्धूतकिरीटकुंडलैः संरंभदृग्भिः परिदष्टदच्छदैः महाभु
जैः साभरणैः सहायुधैः साभास्तृताभूः करभोरुभिर्बभौ ३९ क
बंधास्तत्रचोत्पेतुः पतितस्वशिरोक्षिभिः उद्यतायुधदोर्दंडैराधा
वंतोभटान्मृधे ४०

दृशोयेषुतैः परिदष्टाद्च्छदा ओष्ठायेषुतैः ३९ पतितानियानि
स्वशिरांसितत्रत्यैरक्षिभिः तैः पश्यंतइत्यर्थः उद्यतान्यायुधानियैः तैर्दोर्दंडैर्युक्ताः ४०

वाहानैरावतपादरक्षकान् आरोहंगजयंतारं आर्छयत् विव्याध ४१ ४२ दुर्मर्षः

बलिर्महेंद्रं दशभिस्त्रिभिरैरावतंशरैः चतुर्भिश्चतुरोवाहानेकेनारो
हमार्छयत् ४१ सतानापततः शक्रस्तावद्भिः शीघ्रविक्रमः चिछेदनि
शितैर्भल्लैरसंप्राप्तान्हसन्निव ४२ तस्यकर्मोत्तमंवीक्ष्यदुर्मर्षःशक्ति
माददे तांज्वलंतींमहोल्काभांहस्तस्थामछिनद्धरिः ४३ ततः शूलंततः
प्रासंततस्तोमरमृष्टयः यद्यछस्त्रंसमादद्यात्सर्वंतदछिनद्विभुः ४४
ससर्जाथासुरींमायामंतर्धानगतोसुरः ततः प्राउरभूच्छैलः सुरानीको
परिप्रभो ४५

असहनोबलिः ४३ ४४ ४५

पि

टंकवत्तीक्ष्णाग्रैः शिखरैः सहिताः ४६ ४७ ४८ स्तनयित्नवश्च अंगारान्मुमुचुरित्य

ततो निपेतुस्तरवो दह्यमाना दवाग्निना शिलाः सटंकशिखराश्चूर्णयंत्यो द्विषद्बलं ४६ महोरगाः समुत्पेतुर्दंदशूकाः सवृश्चिकाः सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ४७ यातुधान्यश्च शतशः शूलहस्ता विवाससः छिंधि भिंधीति वादिन्यस्तथा रक्षोगणाः प्रभो ४८ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ४९ सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः सांवर्त्तक इवात्युग्रो विबुधध्वजिनीमधाक् ५०

नुषंगः ४९ अधाक् आर्षः अधाक्षीदित्यर्थः ५०

श्री

उद्भूतैस्तरंगैरावर्तैश्च भीषणः ५१ एवमन्यैश्च दैत्यैः सृज्यमानासु ५२ यत्र यदा तत्र तदा तैर्ध्यातः सन् ५३ अष्टौ आयुधयुक्ता बाहवो यस्य श्रीकौस्तुभश्च अनर्घ्यं किरी

ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत प्रचंडवातैरुद्धूततरंगावर्तभीषणः ५१
एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ५२
ततस्तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभावनः ५३
ततः सुपर्णांससकृतांघ्रिपल्लवः पिशंगवासा नवकंजलोचनः अदृश्यताष्टायुधबाहु
रुल्लसत्श्रीकौस्तुभानर्घ्यकिरीटकुंडलः ५४

टं च कुंडले च उल्लसंति श्रीकौस्तुभादीनि यस्मिन् ५४ श्रीरामकृष्णाभ्यां नमः ६७

असुराणांकूटंकर्म मंत्रादिप्रयोगः तस्माज्जाताः महिनामहिम्ना हरेःस्मृतिरेवस
र्वासांविपदांविमोक्षणरूपाकिमुतहरेःप्रवेशइत्यर्थः ५५ इमारिवाहःसिंहवाहःअ

तस्मिन्प्रविष्टेःसुरकूटकर्मजामायाविनेशुर्महिनामहीयसः स्व
प्नोपथाहिप्रतिबोधआगतेहरि स्मृतिःसर्वविपद्विमोक्षणं ५५
दृष्ट्वामधेगरुडवाहमिभारिवाहआविध्यशूलमहिनोदथकालने
मिः तल्लीलयागरुडमूर्ध्निपतत्गृहीत्वातेनाहनन्नृपसवाहमरिंत्र्य
धीशः ५६

हिनोत्तुक्षिप लीलयैवतद्गृहीत्वा अहनत् हेनृप ५६ श्रीरामचंद्राय

यस्यचक्रेणकृत्तशिरसौपेततुः तंतथाभूतमपिआहत्यसंघट्य अंऽजेंद्रंगरुडमहनत्
तंहंतुंगदामुद्यन्निन्यस्यर्थः आद्यः हरिः ५७ इतिश्रीभागवतेमहापुराणेअ० टीका

मालीसुमाल्य॰ तिबलौयुधिपेततुर्यच्चक्रेणकृत्तशिरसावथमाल्यवांस्तं
आहत्यतिग्मगदयाऽहनदंऽजेंद्रंतावच्छिरोऽछिनदरेर्नदतोऽरिणाद्यः ५७
इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेदेवासुरसंग्रामेदशमोध्या
यः १० श्रीशुकउवाच अथोसुराः प्रत्युपलब्धचेतसःपरस्यपुंसःपरया
नुकंपया जघ्नुर्भृशंशक्रसमीरणादयस्तांस्तान्रणेयैरभिसंहताःपुरा १

१

दशमः १० एकादशेतुदैत्येषुदैत्यघातिषुनारदः देवानवारयच्छुक्रोमृतान्दैत्यानजीवयत्

उदयछत्तत्वगन्निन्ये २३ निबद्धान्यक्षीणियेषांतान्बालान्जित्वानदः कपदवृत्तिर्यथा
तेषांधनंहरातितथाहेमूढमायेशान्अस्मान्जेतुमिछसि ४ मत्प्रभावंश्रणिकृत्यारु॥

वैरोचनायसंरब्धोभगवान्पाकशासनः उदयछ धदावज्रंप्रज्ञाहाहेतिचुक्रुशुः२
वज्रपाणिस्तमाहेदंतिरस्कृत्यपुरःस्थितं मनस्विनंसुसंपन्नंविरिंचेतंमहामृधे ३ न
टवन्मूढमायाभिर्मायेशान्नोजिगीषसि जित्वाबालान्निबद्धाक्षान्नटोहरतितद्धनं
४ आरुरुक्षंतिमायाभिरुत्सिसृप्संतियेदिवं तान्दस्यून्विधुनोम्यज्ञान्पूर्वस्माच्च

पदादधः ५

आरुरुक्षंतिआरोढुमिछंतियेउत्सिसृप्संतिउल्लंघयितुमिछंतिमोक्ष
मिछंतीत्यर्थः अधोविधुनोमिपातयामि ५ श्रीरामचंद्रायनमोनमः ॥७॥ ७

६ ७ कालखड्गंकालयंत्रितं अतोनलक्ष्यंति तत्रएवंविवेकेयूयमपंडिताः अ
निपुणाः ८ तत्रकीर्त्तिजयादोआत्मानंसाधनंमन्यमानानांवोगिरोनगृह्णीमः

सोहंदुर्मोचिनस्तेऽयवज्रेणशात पर्वणा शिरोहरिष्येमंदात्मन्घटस्वज्ञातिभिः
सह ६ बलिरु० संग्रामेवर्त्तमानानांकालचोदितकर्मणां कीर्त्तिर्जयोऽजयोमृत्युः स
र्वेषांस्युरनुक्रमात् ७ तमिमंकालखड्गंजनाःपश्यंतिसूरयः नहृष्यंतिनशोचंतितत्र
यूयमपंडिताः ८ नवयंमन्यमानानामात्मानंतत्रसाधनं गिरोवःसाधुशोच्यानांगृ
ह्णीमोमर्मताडनाः ९ शुक० इत्याक्षिप्यविभुंवीरोनाराचैर्वीरमर्दनः आकर्णपूर्णैरह
नदाक्षेपैराहतंपुनः १० मर्मसुताडनंयामिस्ताः ९ विभुर्मिदं वीरोबालिः १०

तोत्रमंकुशः तेनाहतइव ११ सयानः विमानसहितः १२ १३ १४ १५ १६ १७

एवंनिराकृतोदेवोवैरिणातथ्यवादिना। नामृष्यत्तदधिक्षेपंतोत्राहतइवद्विपः ११
प्राहरत्कुलिशंतस्माअमोघंपरमर्दनः सयानोन्यपतद्भूमौछिन्नपक्षइवाचलः १२
सखायंपतितंदृष्ट्वाजंभोबलिसखःसुहृत् अभ्ययात्सौहृदंसख्युर्हतस्यापिसमा
चरन् १३ ससिंहवाहआसाद्यगदामुद्यम्यरंहसा जत्रावताडयच्छक्रंगजंचसुमहाबलः
१४ गदाप्रहारव्यथितोभृशंविह्वलितोगजः जानुभ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ
ततोरथोमातलिनाहरिभिर्दशशतैर्वृतः आनीतोद्विपमुत्सृज्यरथमारुरुहेविभुः १६
तस्यतत्पूजयन्कर्मयंतुर्दानवसत्तमः शूलेनज्वलतातंतुस्मयमानोऽहनन्मृधे १७

१८ नमुचिर्बलः पाकश्चेतिनारदवचनात्त्रयः आजग्मुः १९ २० त्रयाणांपृथग्वि

सेहेरूजंसुदुर्मर्षांसत्वमारंभ्यमातलिः इंद्रोजंभस्यसंकुद्धोवज्रेणापाहरच्छिरः
१८ जंभेश्रुत्वाहतंतस्यज्ञातयोनारदादृषेः नमुचिश्चबलःपाकस्तत्रापेतुस्त्वरान्वि
ताः १९ वचोभिः परुषैरिंद्रमर्दयंतोऽस्यमर्मसु शरैरवाकिरन्मेघाधाराभिरिवपर्वतं
२० हरीन्दशशतान्याजौहर्य्यश्वस्यबलःशरैः तावद्भिरर्दयामासयुगपल्लघुहस्त
वान् २१ शताभ्यांमातलिंपाकोरथंसावयवंपृथक् सकृत्संधानमोक्षेणतदद्भु
तमभूद्रणे २२ नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः आहत्यव्यनदत्संख्येस
तोयइवतोयदः २३
क्रमानाह हरीनितित्रिभिः तै र्यश्वस्यइंद्रस्य तावद्भिःदशभिः
शरैः २१ आहत्यइंद्रंविव्याध २३

प्रावृट्कालीनंसूर्यं २४ वणिक्पथाः वणिजः भिन्नानौर्येषांतेभिन्ननावइत्यर्थः २५

सर्वतः शरकूटेनशक्रंसरथसारथिं छादयामासुरसुराः प्रावृट्सूर्यमिवांबुदाः २४ अलक्षयंतस्तमवनौविह्वलाविचुक्रुशुर्देवगणाः सहानुगाः अनायकाः शत्रुबलेननिर्जितावणिक्पथाभिन्ननवोयथाऽर्णवे २५ ततस्तुराषाडिषुबद्धपंजरात्‌विनिर्गतः साश्वरथध्वजाग्रणीः बभौदिशः खंपृथिवींचरोचयन्‌स्वतेजसासूर्यइवक्षपात्यये २६ निरीक्ष्यपृतनांदेवः परैरभ्यर्दितांरणे उदयच्छद्रिपुंहंतुंवज्रंवज्रधरोरुषा २७ सतेनैवाष्टधारेणशिरसीबलपाकयोः ज्ञातीनांपश्यतांराजन्‌जहार जनयन्‌भयं २८

तुराषाडिंद्रः अश्वादिस हितोविनिर्गतः अग्रणीः सारथिः २६

२७ २८

शोकामर्षाभ्यांयुक्तयारुषाक्रोधेनान्वितः सन् इंद्रंहंतुंपरमोद्यमंचकार २९ घंटा

नमुचिस्तद्धंटंदृष्ट्वाशोकामर्षरुषान्वितः जिघांसुरिंद्रंनृपतेचकारपरमोद्यमं २९
अश्मसारमयंशूलंघंटावद्धेमभूषणं प्रगृह्या भ्यद्रवत्क्रुद्धोहतोसीतिवितर्ज्ज
यन् प्राहिणोद्देवराजायनिनदन्मृगराडिव ३० तदापतद्गगनतलेमहोल्बणंवि
चिच्छिदेहरिरिषुभिः सहस्रधा तमाहनन्नृपकुलिशेनकंधरेरुषान्वितस्त्रिदशाप
तिः शिरोहरन् ३१ नतस्यहित्वचमपिवज्रमूर्जितोबिभेदयः सुरपतिनौजसेरितः
तदद्भुतंपरमतिवीर्यवृत्रभित्तिरस्कृतोनमुचिशिरोधरत्वचा ३२

वत्घंटाभियुक्तं ३० ३१ अतिवीर्यंवृत्रंभिनत्तीतितथा ३२

३३ पतत्रैः पक्षैः ३४ सारमयंवीर्याधिकंत्वाङ्गंतपएववृत्रः येनवज्रेणमयाविप्रा

तस्मादिंद्रोऽविमेच्छत्रोर्वज्रः प्रतिहतोयतः किमिदंदैवयोगेनभूतं
लोकविमोहनं ३३ येनमेपूर्वमद्रीणांपक्षच्छेदः प्रजात्यये कृतोनि
विशतांभारैः पतत्रैः पततांभुवि ३४ तपःसारमयंत्वाष्ट्रंवृत्रोये
नविपाटितः अन्येचापिबलोपेताः सर्वास्त्रैरक्षतत्वचः ३५ सोयं
प्रतिहतोवज्रोमयामुक्तोऽसुरेऽल्पके नाहंतदाददेदंडंब्रह्मतेजोऽप्य
कारणं ३६

दितः ३५ दंडंलकुटतुल्यंकुलि शं ब्रह्मतेजः दधीचेःसामर्थ्यं ३६

आर्द्रशुष्काभ्यां मृत्युर्नैवेति ३८ ३९ उभयात्मत्वमेवाह नशुष्केण न चार्द्रेण

इति शक्रं विषीदंतमाह वाग् अशरीरिणी नायं शुष्कैर् अथो नार्द्रैर् वधमर्हति दानवः ३७ मयास्मै यद्धुरोदत्तो मृत्युर्नैनार्द्रशुष्कयोः अतोऽन्यश्चिंतनीयस्त्व् उपायो मघवन् रिपोः ३८ तां दैवीं गिरमाकर्ण्य मघवा सुसमाहितः ध्यायन् फेनमथापश्यद् उपायम् उभयात्मकं ३९ नशुष्केण न चार्द्रेण जहार नमुचेः शिरः तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन् मुं ४०

फेनेन तथा च श्रुतिः अपां फेनेन नमुचेः शिर इंद्रोदवर्त्तयद् इति ४० श्रीरामचंद्र

४१ ४२ ४३ ४४ अनुचरैरुद्गीयमानाइत्यर्थः उद्गीयमानैरनुचरैः सहेतिवा ४५

गंधर्वमुख्यौजगतुर्विश्वावसुपरावसू देवदुंदुभयोनेदुर्नर्तक्योननृतुर्मुदा
४१ अन्येप्येवंप्रतिद्वंद्वान्वाय्वग्निवरुणादयः सूदयामासुरस्त्रौघैर्मृ
गान्केसरिणोयथा ४२ ब्रह्मणाप्रेषितोदेवान्देवर्षिर्नारदोनृप वार
यामासविबुधान्दृष्ट्वादानवसंक्षयं ४३ नारदउ० भवद्भिरमृतंप्राप्तं
नारायणभुजाश्रयैः श्रियासमेधिताःसर्वउपारमतविग्रहात् ४४
शुकउ० संयम्यमन्युसंरंभंमानयंतोमुनेर्वचः गीयमानाऽनुचरैर्य
युःसर्वेत्रिविष्टपं ४५

४६ अविनष्टाअवयवायेषां विद्यमानाशिरोधरायेषांतान् ४७ प्रस्यापन्नानिपुनः

येवाशिष्टारणेतास्मिन्नारदानुमतेनते बलिंविपन्नमादायअस्तंगिरि मुपागमन् ४५ तत्रा विनष्टावयवान् विद्यमानशिरोधरान् उशना जीवयामाससंजीविन्यास्वविद्यया ४७ बलिश्चोशनसास्पृष्टः प्रत्याप न्नेंद्रियस्मृतिः पराजितोपिनाखिद्यत् लोकतत्वविचक्षणः ४ इतिश्रीभागवतेमहापुराणेअ० देवासुरसंग्रामेएकादशोध्यायः ११

प्राप्तानींद्रियाणिस्मृतिश्चयेनसः ४८ इतिश्रीभागवतेअष्टमेटीकायांएकादशोध्या

द्वादशोमोहिनीरूपविभ्रमालोकनोत्सुकं भवंसंमोहयामासहरिःपुनरसांत्वयत् १ अमुह्यन्नसुराविष्णुमायया नतदद्भुतं इतिवक्तुंमहादेवमोहो॰ यमुपवर्ण्यते २ हरिः

बादरायणिरु॰ वृषध्वजोनिशम्येदंयोषिद्रूपेणदान
वान् मोहयित्वासुरगणान्हरिःसोममपाययत् य १ वृ
षमारुह्यगिरिशःसर्वभूतगणैर्वृतः सहदेव्याययौद्र
ष्टुंयत्रास्तेमधुसूदनः २ सभाजितोभगवतासादरंसो
मयाभवः सूपविष्टउवाचेदंप्रतिपूज्यस्मयन्हरिं ३

सोममपाययदितीदंनिशम्यसयत्रास्तेतत्रतद्रूपंद्रष्टुंययाविसुत्तरेणान्वयः १२

श्रीमद्भागवतम् ८

त्वयिकिंचिन्नचाश्चर्यंवयंत्वाश्चर्यमानसाः इतिवक्ष्यन्महादेवस्तुष्टावहरिमष्टभिः १ त्वयिमहामायाविनिपरमेश्वरेनकिलकिंचिदघटितमिव वयंतुपरमकौतूहलेनद्रष्टुमागताइतिब्रुवुधांसंबोधयन्स्तौति हेदेवदेव कुतोहंदेवानांदेवइत्यत

श्रीमहादेवउवाच देवदेवजगद्व्यापिन्जगदीशजगन्मय सर्वेषामसिभावानांत्वमात्माहेतुरीश्वरः ४

आह हेजगद्व्यापिन् तत्कुतः हेजगन्मय तर्हिकिंप्रधानंनहेजगदीश तत्रकुतस्तत्राह सर्वेषामपित्वंहेतुः अन्तर्ईश्वरः आत्मत्वाच्चनजडंप्रधानंत्वमित्यर्थः ४ नमोनमोभगवतेश्रीराम

ननुजगन्मयत्तोत्त्याजगतन्नत्पत्त्यादिनाः सत्यत्वेनचजाम्येनचममा पिर्क्कितथा
त्वंब्रूषेनहिनहीत्याह आद्यंतौमध्यंचअस्यजगतोयतोब्रह्मणोभवंति अस्यच
अव्ययस्यएतानिनसंति यच्चब्रह्मइदंकारास्पदंदृश्यंअहंकारास्पदंद्रष्टृबहिर्भो

आद्यंतावस्ययन्मध्यमिदमन्यदहंबहिः यतोऽव्ययस्यनैतानितत्
सत्यंब्रह्मचिद्भवान् ५ तवैवचरणांभोजंश्रेयस्कामानिराशिषः वि
सृज्योभयतःसंगंमुनयः समुपासते ६

ग्यंअन्यत् भोकृचनतत्सत्यंचचिद्रूपंचब्रह्मैवभवान् अतोनतवविकारादिशंकेत्य
र्थः ५ तवैवंभूततत्वेमुमुक्षूणामाचारःप्रमाणंइत्याह तवैवेति उभयतइहामुत्र

ननु ब्रह्मैवचेदहं तर्ह्यसंगोदासीनस्यममचरणांभोजोपासनयाकिंतेषांतत्रा
ह त्वमिति ब्रह्मत्वेपित्वंनाऽस्यंतमुदासीनः किंतुविश्वस्यप्रपंचस्योदयादीनां
हेतुः ननुपाधीनामात्मनांजीवानामीश्वरश्चतत्फलदाता तर्हिकिंराजादिव

त्वंब्रह्मपूर्णममृतंविगुणंविशोकमानंदमात्रमविकारमनन्यद
न्यत् विश्वस्यहेतुरुदयास्थितिसंयमानामात्मेश्वरश्चतदपेक्षत
याऽनपेक्षः ७

कयाऽप्यपेक्षयासेवकेभ्यः फलंद दामि नहिनहि अनपेक्षएवत्वं
तर्हिकिमीश्वरत्वेनतत्राह तैरात्मभिः तत्फलदानार्थमपेक्षतइतितदपेक्षः त

स्वभावस्तदपेक्षतातया अनपेक्षत्वमेवदर्शयितुंतदीयंब्रह्मत्वंवि
शिनष्टि पूर्णंअमृतंचसुखरूपं विषयसुखवैलक्षण्यार्थमाह अ
विकारंनित्यंआनंदमात्रंच कुतःविशोकंतत्कुतः विगुणंकिंच अ
नन्यत् नविद्यते अन्यद्यस्मात् ब्रह्मव्यति रिक्ताभावादपिनिरपे
क्षत्वमित्यर्थः तर्हिसर्वात्मकत्वेतत्तद्विकारप्रसंगोदुर्वारः तत्राह
अन्यत् सर्वतोव्यतिरिक्तंचकारणत्वात् नह्येवंभूतसुखात्मकब्र
ह्मस्वरूपस्यनवान्याऽपेक्षाऽस्तिअतः केवलंभक्तानुग्रहार्थमेवतवै
श्वर्य्येनस्वार्थमित्यर्थः ७ श्री

अन्यत्वमनन्यत्वंचैकस्यकुतइत्याशंक्यदृष्टांतेनोपपादयति सदसत्कार्यकारण
रूपंद्वयंअद्वयंचपरमकारणत्वमेवैकः कृतंकुंडलादिरूपंद्वयं अकृतंकेवलमद्वयं
स्वर्णंयथैकमेव तद्वदेवेहत्वयिवस्तुतोभेदोनास्ति कथंतर्हिभेदप्रतीतिस्तत्रा

एकस्त्वमेवसदसत्द्वयमद्वयंचस्वर्णंकृताकृतमिवेहनवस्तुभेदः अज्ञानतस्त्व
यिजनैर्विहितोविकल्पोयस्माद्गुणव्यतिकरोनिरुपाधिकस्य ८ त्वांब्रह्मकेचिद
वयंत्युतधर्ममेकएकेपरंसदसतोःपुरुषंपरेशं अन्येवयंतिनवशक्तियुतंपरं
त्वांकेचिन्महापुरुषमव्ययमात्मतंत्रं ९

ह अज्ञानतइति कुतःयस्मान्निरुपाधि
कस्यैवतवायंगुणैर्व्यतिकरोभेदोनस्वतः ८ अतएवत्वांबहुधावर्णयंतिवस्तुतस्तु

केपिनजानंतीत्याह द्वाभ्यां त्वांब्रह्मवेदांतिनोवयंतिमन्यंते त्वामेवधर्मंमीमांसका
मन्यंते प्रकृतिपुरुषयोःपरंपुमांसंसांख्याः विमलोत्कर्षिणीज्ञानाक्रियायोगाप्रह्वी
सत्याईशानाअनुग्रहाचेत्येवंनवशक्तियुक्तंपरंपांचरात्राः महापुरुषंपातंजलाः ९

नाहंपरायुरृषयोनमरीचिमुख्याजानंतियद्विरचितंखलुसत्वस
र्गाः यन्माययामुषितचेतसईशदैत्यमर्त्यादयःकिमुतशश्वद
भद्रवृत्ताः १०

परायुर्ब्रह्मा सत्वसर्गाः सत्वगुणेनसृष्टाअपियेनत्वयाविरचि
तंविश्वमपिखलुतत्वतोनजानंति किंपुनस्त्वांहेईश अभद्रंराजसंतामसंचवृत्तं
उत्पत्तिश्चयेषांतेनजानंतीतिकिमुवक्तव्यं १० श्रीगणेशायनमः ॥छ॥ ॥छ॥

किंतुत्वंसर्वंजानासीत्याह सत्वंसर्वअवरुंसेव्याप्तोपिजानासि किंतत्सर्वं समीहि
तंस्वकृतं तंअदंस्थितिजन्मनाशंअमुष्यजगतोजन्मादिभूतानामीहितंचजगतोभ
वबंधंचमोक्षंच व्याप्तौदृष्टांतः चराचराख्यंदेहजातंखंचयथावायुराविशातितथा

सत्वंसमीहितमदःस्थितिजन्मनाशंभूतेहितंचजगतोभवबंधमोक्षौ वायुर्यथा
विशतिखंचचराचराख्यंसर्वंतदात्मकतया गमोः वरुंत्से ११ अवतारमथाह
शरममाणस्यतेगुणैः सोहंततद्रष्टुमिछामियत्तेयोषिद्वपुर्धृतं १२ येनसंमोहितादै
त्याः पायिताश्चामृतंसुराः तद्दिदृक्षवआयाताःपरंकौतूहलंहिनः १३ कथमववरुंत्से

तदात्मकतया तस्यसर्वस्यात्मतयेत्यर्थःआत्मत्वेहेतुः अवगमःज्ञानरूपइति ११ ए
वंस्तुत्वाप्रस्तुतंविज्ञापयति अवताराइतिद्वाभ्यां १२ १३

१४ सुरकार्याणियोषिद्वेषेणभविष्यंतीतिपश्यता अयंभावः अवश्यंतावदुन्मत्तान् दैत्यान्वंचयित्वादेवेभ्योऽमृतंदेयं नचैवंवैषम्यंरूपांतरेणकर्तुमुचितं अतोवंचनमोहनादिसारंकामिनीरूपंमयाधृतमिति १५

शुक उ॰ एवमभ्यर्थितोविष्णुर्भगवान्शूलपाणिना प्रहस्यभावगंभीरंगिरिशंप्रत्यभाषत १४ श्रीभगवानु॰ कौतूहलायदैत्यानांयोषिद्वेषोमयाकृतः पश्यतासुरकार्याणि गतेपीयूषभाजने १५ तत्तेहंदर्शयिष्यामिदिदृक्षोःसुरसत्तम कामिनांबहुमतंसंकल्पप्रभवोदयं १६ श्रीशुकउ॰ इतिब्रुवाणोभगवांस्तत्रैवांतरधीयत सर्वतश्चारयंश्चक्षुर्भवआस्तेसहोमया १७

तद्रूपंदर्शयिष्यामि संकल्पप्रभवः कामः तस्योदयोयस्मात् १६

विचित्राणिपुष्पाणिअरुणाः पल्लवाश्चयेषांतेद्रुमायस्मिन् लसत्दुकूलेनपर्यस्तेपरिवृ
त्तेनितंबेमेखलायस्याःतां १८ उत्पतन्पतत्कंदुकलीलावेशेनयेआवर्त्तनोद्वर्त्तनेनम
नोभ्रमनेताभ्यांकंपितयोस्तनयोःप्रक्लृष्टहाराणांचोरुभारैःप्रतिपदंमध्येप्रभज्यमा

ततोददर्शोपवनेवराङ्गियं विचित्रपुष्पारुणपल्लवद्रुमे विक्रीडन्तींकंदुकलीलयालसत्
दुकूलपर्यस्तनितंबमेखलां १८ आवर्त्तनोद्वर्त्तनकंपितस्तनप्रक्लृष्टहारोरुभरैःपदेप
दे प्रभज्यमानामिवमध्यतश्चलत्पदप्रवालंनयतींततस्ततः १९ दिक्षुभ्रमत्कंदुकचा
पलेक्षणं प्रोद्विग्नतारायतलोललोचनां स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीला
लकमंडितानना २०

नामिव चलत्पदमेवप्रवालवत्कोमलंतत स्ततोनयंती १९ दिक्षु
भ्रमतःकंदुकस्यचापलैश्चांचल्यैः प्रसरांप्रोद्विग्नतारेआयतेलोलेचंचलेलोचनेयस्याः स्व

कर्णाभ्यांविभ्राजितेयेकुंडलेताभ्यामुल्लसंतौकपोलौताभ्यांचनीलालकैश्चमंडितमान
नंयस्याः २० सनह्यतींबध्नंतीं जगद्विमोहयंतीं २१ तांवीक्ष्य देवः श्रीरुद्रः आत्मानमं
तिकेस्थितामुमांस्वगणांश्चनवेद कथंभूतः इतिएवंभूतयाकंडुकलीलयाईषद्व्री

॥ ९ ॥ श्लथत्तूडुकूलंकबरींचविच्युतांसंनह्यतींवामकरेणवल्गुना विनि
॥ ९ ॥ घ्नतीमन्यकरेणकंडुकंविमोहयंतींजगदात्ममायया २१ तांवीक्ष्यदे

विकं

वइंडुकलीलयेषद्व्रीडास्फुटास्मितविसृष्टकटाक्षमुष्टः स्त्रीप्रेक्षणप्रतिसमीक्षण
विह्वलात्मानात्मानमंतिकउमांस्वगणांश्चवेद २२

तेनसहवि
डातयाअस्फुटास्मितं
स्पष्टोयःकटाक्षः तेनमुष्टोवंचितः अतएवकस्य यंयत्नास्त्रियाःप्रेक्षणंतयाचप्रतिसमीक्ष
णंताभ्यांविह्वलआत्मामनोयस्य २२

तंकंडुकमनुव्रजंत्याः स्त्रियाः लघु सूक्ष्मं वासः सस्त्रंकांचीसहितं २३ विषज्जंत्यांकुं

तस्याःकराग्रात्सतुकंडुकोयदागतोविदूरंतमनुव्रजात्स्त्रियाः वासः सस्
त्रंलघुमारुतोहरद्भवस्यदेवस्यकिलानुपश्यतः २२ एवंतांरुचिरापांगीं
दर्शनीयांमनोरमां दृष्ट्वातस्यांमनश्चक्रे विषज्जंत्यांभवः किल २४
तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः भवान्याअपिपश्यंत्यागतह्री
स्तत्पदंययौ २५ सातमायांतमालोक्यविवस्त्राव्रीडिताभृशं निलीय
मानावृक्षेषुहसंतीनान्वतिष्ठत २६ तामन्वगच्छद्भगवान् भवःप्रमुषितें
द्रियः कामस्यचवशंनीतःकरेणुमिवयूथपः २७

चिंतकदासैरात्मानंनिरीक्षमा

पाणां २४ तत्सुदंतम्याः समीपयौ २६

सरित्सरः

२७ २८ २९ अंगहेराजन् ३० ३१ ३३ एवंतामनुधावन्हरः सुशैलादिषुचसंनिहि

सोऽनुव्रज्यातुवेगेनगृहीत्वा निछतींस्त्रियं केशबंधउपानीयबाहुभ्यांपरिषस्वजे २८
सोपगूढाभगवताकरिणाकरिणीयथा इतस्ततः प्रसर्पतीविप्रकीर्णशिरोरुहा २९
आत्मानंमोचयित्वांगसुरर्षभभुजांतरात् प्राद्रवत्सापृथुश्रोणीमायादेवविनिर्मिता
३० तस्यासौपदवींरुद्रोविष्णोरद्भुतकर्मणः प्रत्यपद्यतकामेनवैरिणेवविनिर्जितः
३१ तस्यानुधावतोरेतश्चस्कंदामोघरेतसः शुष्मिणोयूथपस्येववासितामनुधा
वतः ३२ यत्रयत्रापतन्मह्यांरेतस्तस्यमहात्मनः तानिरूप्यस्यहेम्नश्चक्षेत्राण्या
सन्महीपते ३३ सरित्सरःसुशैलेषुवनेषूपवनेषुच यत्रक्वचासन्नृषयस्तत्रसंनिहि
तोबभूव ३४

३५ तदुहमायय्याङ्गीकरणं ३६ ३७ स्वांनिष्ठांप्रकृतिं ३८ ३९ कालेनस्रष्टा

स्कन्नेरेतसिसोऽपश्यदात्मानंदेवमायया जगीकृतंनरपश्रेष्ठसंन्यवर्त्ततकश्मलात् ३५
अथावगतमाहात्म्यआत्मनोजगदात्मनः अपरिज्ञेयवीर्यस्यनमेनेतदुहाद्भुतं ३६ त
मविक्लवमव्रीडमालक्ष्यमधुसूदनः उवाचपरमप्रीतोबिभ्रत्स्वांपौरुषींतनुं ३७ श्रीभ
गवानु० दिष्ट्यात्वंविबुधश्रेष्ठस्वांनिष्ठामात्मनास्थितः यन्मेस्त्रीरूपयास्वैरंमोहितोऽ
स्यंगमायया ३८ कोनुमेऽतितरेन्मायांविषक्तस्त्वदृतेपुमान् तांस्तांन्विसृजतींभावान्
दुस्तरामकृतात्मभिः ३९ सेयंगुणमयीमायानत्वामभिभविष्यति मयासमेताकाले
न कालरूपेणभागशः ४० दिनिमित्तेनमयाकालरूपेणभागशोरजआद्यंशेनसमेता

मंगीतासी ॐ

२

४१ ४२ ४३ ४४ अस्याध्यार्थनिगमनं [illegible]तीति ४५ एतत्कीर्त्तनादेः फलमाह एतदि

एवंभगवताराजन्श्रीवत्सांकेनसत्कृतः आमंत्र्यतंपरिक्रम्यसगणःस्वालयंययौ ४०
आत्मांशभूतांतांमायांभवानींभगवान्भवः शंसतामृषिमुख्यानांप्रीत्याचष्टाथभारत
४१ अयिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः अहंकलानामृषभोविमुह्ये
ययावशोऽन्येकिमुतास्वतंत्राः ४२ यंमामपृच्छस्त्वमुपेत्ययोगात्समासहस्रांतउपारतं
वै सएषसाक्षात्पुरुषःपुराणोनयत्रकालोविशतेनवेदः ४३ श्रीशुकउ० इतितेभिहित
स्तातविक्रमःशार्ङ्गधन्वनः सिंधोर्निर्मथनेयेनधृतःपृष्ठेमहाचलः ४४ एतन्मुहुः
कीर्त्तयतोऽनुश्रृण्वतोनरिष्यतेजातुसमुद्यमः क्वचित् यदुत्तमश्लोकगुणानुवर्णनंस
मस्तसंसारपरिश्रमापहं ४६

भगवताह्लतंभक्तपक्षपातंस्मरन्नमस्करोति असतामविषयंभमोभजनंतेनगम्य
मंघ्रिंप्रपन्नान्सिंधुमथ्यंसिंधोर्मथनेजातममृतंयःआशयत् अमोजयत् ४७

असदविषयमंघ्रिंभावगम्यंप्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं कपट
युवतिवेषोमोहयन्यःसुरारीन्तमहमुपसृतानांकामपूरंनतोस्मि ४७ इति
श्रीभा० शंकरमायामोहनंद्वादशोध्यायः १२ शुक० मनुर्विवस्वतःपुत्रःश्राद्धदे
वइतिश्रुतः सप्तमोवर्त्तमानोयस्तदपत्यानिमेशृणु १।१॥ इक्ष्वाकुर्नभगश्चैवधृष्टः
शर्यातिरेवच नरिष्यंतोथनाभागःसप्तमोदिष्टउच्यते २ इतिभा० अ० अध्यायः १२

त्रयोदशेतुवर्ण्यंतेसप्तमादीन्यनुक्रमात् मन्वंतराणिसर्वाणिषड्विधानिपृथक्पृथक् १
सप्तमादिमन्वंतराण्याह मनुरित्यादिनापादध्यायसमाप्ति १ २

भा॰ अ॰

८

३ आदित्यादयोदेवाइत्यन्वयः ४ भगवतोजन्मअवतारः तमेवाह आदित्यानांवि

करूषश्चपृषधश्चदशमोवसुमान्स्मृतः मनोर्वैवस्वतस्यैतेदशपुत्राःपरंतप २ आ
दित्यावसवोरुद्राविश्वेदेवामरुद्गणाः अश्विनावृभवोराजन्निंद्रस्तेषांपुरंदरः ४ क
श्यपोत्रिर्वसिष्ठश्चविश्वामित्रोथगौतमः जमदग्निर्भरद्वाजइतिसप्तर्षयःस्मृताः
५ अत्रापिभगवज्जन्मकश्यपाददितेरभूत् आदित्यानामवरजोविष्णुर्वामनरूपधृ
क् ६ संक्षेपतोमयोक्तानिसप्तमन्वंतराणिते भविष्याण्यथवक्ष्यामिविष्णोःशक्त्या
न्वितानिच ७ विवस्वतश्चद्वेजायेविश्वकर्मसुतेउभे संज्ञाछायाचराजेंद्रयेप्रागभिहि
तेतव ८

वस्यानर्यमापृषेत्याद्युक्तानांमध्येअवरंजन्मयस्यसः ६ शक्त्यावतारेणान्वितानि ७ अ
श्ममंतुंवक्तुंकथामाहविवस्वतइतिस्त्रिभिः ८

एकेवडवांततीयामाहुः ममतुसंज्ञैववडवेतिमतं तदुक्तंषष्ठेसैवभूत्वाऽथवडवानासंसो

ततीयांवडवामेकेतासांसंज्ञासुतास्त्रयः यमोयमीश्राद्धदेवः छाया
याश्चसुतान्शृणु ९ सावर्णिस्तपतीकन्याभार्यासंवरणस्यया श
नैश्चरस्तृतीयोभूद्श्विनौवडवात्मजौ १० अष्टमेंतरआयातेसावर्णि
र्भवितामनुः निर्मोकविरजस्काद्याःसावर्णितनयान्नृप ११ तत्रदेवाःसु
तपसोविरजाअमृतप्रभाः तेषांविरोचनसुतोबलिरिंद्रोभविष्यति १२

४

सुषुवेसुवीति यमश्चयमीचयमुनाश्राद्धदेवश्चेतित्रयःसुताः ९ सावर्णिःपुत्रः १०

पदत्रयंयाचमानायइमांसर्वांमहींसप्तमेमन्वंतरेदत्वा॥ अष्टमेमन्वंतरे विष्णोः प्रसादा

दत्वेमांयाचमानायविष्णवेयःपदत्रयं राद्धमिंद्रपदंहित्वाततः सिद्धिमवा
प्स्यति १३ योसौभगवताबद्धः प्रीतेनसुतलेपुनः निवेशितोऽधिकेस्वर्
गाद्दधुनास्तेस्वराडिव १४ गालवोदीप्तिमान्रामोद्रोणपुत्रः कृपस्तथा
ऋष्यशृंगः पितास्माकंभगवान्बादरायणः १५ इमेसप्त ऋषयस्तत्र
भविष्यंतिस्वयोगतः इदानीमासतेराजन्स्वेस्वआश्रममंडले १६

ऋ्य

देवराडैलब्धमिंद्रपदंहित्वेत्यर्थः १३ १४ रामः परशुरामः द्रोणपुत्रोऽश्वत्थामा १५ इदा
नीमस्मिन्काले आस्ते १६

१७ १८ अद्भुतइंद्रः १९ २० २१ २२ श्रीगोपालकृष्णायनमः

देवगुह्यांसरस्वत्यांसार्वभौमइतिप्रभुः स्थानंपुरंदराद्धृत्वाबलयेदास्यतीश्वरः १७
नवमोदक्षसावर्णिर्मनुर्वरुणसंभवः धृतकेतुर्दीप्तिकेतुरित्याद्यास्तत्सुतान्नृप १८
पारामरीचिगर्भाद्यादेवाइंद्रोऽद्भुतःस्मृतः द्युतिमत्प्रमुखास्तत्रभविष्यंत्यृषयस्ततः १९
आयुष्मतोंबुधारायामृषभोभगवत्कला भवितायेनसंराद्धांत्रिलोकींभोक्ष्यतेऽद्भुतः
दशमोब्रह्मसावर्णिरुपश्लोकसुतोमहान् तत्सुताभूरिषेणाद्याहविष्मत्प्रमुखाद्वि
जाः २१ तत्रापिजन्मभविताहरेर्विश्वसृजांगृहे अमूर्त्तिरितिविख्यातोयेनाप्यायेत
वैजगत् २२

हविष्मत्प्रमुखानामेवकेषांचिन्नामान्याह हविष्मानिति २३ विषूच्यांजातः सन् २४

हविष्मान्सुकृतःसत्योजयोमूर्तिस्तदाद्विजाः सुवासनविरुद्धाद्यादेवाःशंभुःसुरेश्व
रः २३ विष्वक्सेनोविषूच्यांतुशंभोःसख्यंकरिष्यति जातःस्वांशेनभगवान्गृहेविश्व
सृजांविभुः २४ मनुर्वैधर्मसावर्णिरेकादशमआत्मवान् अनागतास्तत्सुताश्चस
त्यधर्मादयोदश २५ विहंगमाःकाम[illegible]गमानिर्वाणरुचयःसुराः इंद्रश्चवैधृ
तस्तेषामृषयश्चारुणादयः २६ आर्यकस्यसुतस्तत्रधर्मसेतुरितिस्मृतः वैधृतायां
हरेरंशस्त्रिलोकींधारयिष्यति २७ भवितारुद्रसावर्णीराजन्द्वादशमोमनुः देववान्
पदेवश्चदेवश्रेष्ठादयःसुताः २८ एकादशमइत्यादिरार्षः २५ २६ २७ २८

२९ नस्यमनोरंतरंसाधयिष्यति सत्यसहस्रः सूनृतापाश्वसुतःसन् ३० ३१ ३२

ऋतधामाचतत्रेंद्रोदेवाश्चहरितादयः ऋषयश्चतपोमूर्तिस्तपश्वाग्नीध्रकादयः
२९ स्वधामाख्योहरेरंशःसाधयिष्यतितन्मनोः अंतरंसत्यसहस्रः सूनृतायाः
सुतोविभुः ३० मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान् चित्रसेनविचित्रा
द्यादेवसावर्णिदेहजाः ३१ देवाःसुकर्मसुत्रामसंज्ञाइंद्रोदिवस्पतिः निर्मोक
तत्वदर्शाद्याभविष्यंत्यृषयस्तदा ३२ देवहोत्रस्यतनयउपहर्त्तादिवस्पतेः
योगेश्वरोहरेरंशोबृहत्यांसंभविष्यति ३३ मनुर्वाइंद्रसावर्णिश्चतुर्दशमए
ष्यति उरुगंभीरबुधा द्याइंद्रसावर्णिवीर्यजाः ३४ दिवस्पतेरिंद्रस्योपहर्त्तासंपाद

३५ क्रियातंतून्कर्मसंततीः वितायिताविस्तारयिष्यति ३६ युगसाहस्त्रेणपर्ययःप
रिवर्त्तोयस्य युगसहस्त्रप्रमाणइत्यर्थः ३७ इतिश्रीभागवतेम०अ० टीकायांत्रयोदशः

पवित्राश्चाक्षुषादेवाः शुचिरिंद्रोभविष्यति अग्निर्बाहुः शुचिः शुद्धोमागधा
यास्तपस्विनः ३५ सत्रायणस्यतनयोबृहद्भानुस्तदाहरिः वितानायांमहा
राजक्रियातंतून्वितायिता ३६ राजन्चतुर्दशैतानित्रिकालानुगतानिते
प्रोक्तान्येभिर्मितःकल्पोयुगसाहस्त्रपर्ययः ३७ इतीश्रीभा०म०॥अ० मन्वंत
रानुवर्णनंनामत्रयोदशः ॥१३॥७ राजोवाच मन्वंतरेषुभगवन्यथामन्वादय
स्त्विमे यस्मिन्कर्मणियेयेन नियुक्तास्तद्वदस्वमे १ चतुर्दशेतुसर्वेषामन्वादीनांय
थायथं पृथक्कर्माणिवर्ण्यंतेभगवद्दत्तावर्तिना ११

पुरुषेणेश्वरेणयज्ञाद्यवक्तारैः शास्यंतेनियुज्यंतइतितथा २ तदेवाह यज्ञादयइति
३ ऋष्यादीनांकर्माण्याह चतुर्युगांतइतिचतुर्भिः पतः येभ्यः श्रुतिगणेभ्यः ४

ऋषिरु॰ मनवोमनुपुत्राश्चसुनयश्चमहीपते इंद्राः सुरगणाश्चैवसर्वेपुरुषुशा
सनाः २ यज्ञादयोयाः कथिताः पौरुष्यस्तनवोनृप मन्वादयोजगयात्रांनयंत्य
भिः प्रचोदिताः ३ चतुर्युगांतेकालेन स्तोग्रेनश्रुतिगणान्यथा तपसाऋषयो
ऽपश्यन्यतोधर्मः सनातनः ४ ततोधर्मंचतुष्पादंमनवोहरिणोदिताः युक्ताः
संचारयंत्यद्धास्वेस्वेकालेमहींनृपाः ५

उदिताउक्ताः युक्ताः संयताः संतोमहींधर्मंसंचारयंति मनवाधर्मंप्रवर्तयंतीत्यर्थः
५

प्रजापालामनुपुत्राः तंधर्मंपालयंति यावदंतंयावन्मन्वंतरावसानंविभागशः पुत्र
पौत्रादिक्रमेणयेचान्येयावाप्रथिमादयोपत्रकर्माणिसोकृत्वेनान्विताः तैश्वसह ६

पालयंतिप्रजापालायावदंतंविभागशः यज्ञभागभुजोदेवायेचतत्रा
नुकीर्त्तिताः ६ इंद्रोभगवताद्दत्तांत्रैलोक्यश्रियमूर्जितां भुंजानःपाति
लोकांस्त्रीन् कामंलोकेप्रवर्षति ७ ज्ञानंचानुयुगंब्रूतेहरिःसिद्धस्व
रूपधृक् ऋषिरूपधरःकर्मयोगंयोगेशरूपधृक् ८

७ प्रसंगाद्न्यान्तरैरपिजगधात्राप्रवर्त्तनमाह ज्ञानमितिद्वाभ्यां सिद्धाःसनकादयः
ऋषयोयाज्ञवल्क्यादयः योगेशाःदत्तात्रेयादयः तत्तद्रूपःसन्ज्ञानकर्मचयोगंचब्रू

प्रजेशा मरीच्यादयस्तेन रूपेण सर्गं करोतीति विशेषः स्वराड्वपुः राजमूर्त्तिः सर्वेषाम
भावाय भवति पृथग्विधा गुणाः शीतोष्णादयो यस्य ९ नामरूपात्मिकया मायया
मोहितात्मभिरेभिर्जनैः नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोपि नैव दृश्यते

सर्गे प्रजेशरूपेण दस्यून् हन्यात् स्वराड्वपुः कालरूपेण सर्वेषामभावाय पृथग्गुणः
स्तूयमानो जनैरेभिर्मायया नामरूपया विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते
१० एतत्कल्पविकल्पस्य प्रमाणं परिकीर्त्तितं यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः
११ इति श्रीभागवते अ० मन्वंतरा० चतुर्दशः १४

तदस्यार्थः १० प्रासंगिकं निरूप्य
प्रस्तुतमेवोपसंहरति एतत्कल्पविकल्पस्य अवांतरकल्पस्य ११ इति अध्यायः ११

बलिं पंचदशो विश्वजिताचार्या अयाजयन् ततोऽसौ स्वर्गमजयद्भयाद्देवा निलिल्यिरे १
अथ येयं तेन बाध्यायामवा मेंबामनत्वे स्थिते निग्रहश्छलतो यत्र बलेर्भूयाननुग्रहः २
ईश्वरः स्वयं कृपणवत्कस्माद्धेतोरयाचत लब्धार्थोऽपि त्वापितं कस्माद्बबंध १ २ तत्र

राजोवाच बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत भूत्वेश्वरः कृपणवल्लब्धार्थोऽपि बबं
धतं १ एतद्वेदितुमिच्छामो महत्कौतूहलं हि नः यज्ञेश्वरस्य पूर्णस्य बंधनं चाऽप्यनाग
सः २ शु॰ उ॰ ॥ पराजितश्रीरसुभिश्च हापितो हींद्रेण राजन् भृगुभिः स जीवितः स
र्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्माऽर्थनिवेदनेन ३ तावद्बलेस्त्रिलोकीमप

हर्तुं याञ्चाछलं कृतवानिति वक्तुं ब्राह्मणाराधनबलेन बलेरकांड एव स्वर्गविजयक्रम
माह पराजितश्रीरित्यादिना यावदध्यायसमाप्ति युद्धे पराजिता श्रीर्येन स इंद्रेण असुभि

त्रिणाकंस्वर्गंजेतुमिछंतंविश्वजितायागेनायाजयन् महाभिषेकेणऐंद्रेणवद्रुत्र
ब्राह्मणप्रसिद्धेन ४ हर्यश्वस्येंद्रस्ययेतुरंगास्तेषामिववर्णोहरितोयेषां ५ पुरदंसु

तेब्राह्मणाभृगवः प्रीयमाणाअयाजयन्विश्वजितात्रिणाकं जिगीषमाणंविधिना
भिषिच्यमहाभिषेकेणमहानुभावाः ४ ततोरथः कांचनपट्टनद्धोहयाश्चहर्यश्वतु
रंगवर्णाः ध्वजश्चसिंहेनविराजमानोहुताशनाद्दासहविर्भिरिद्धात् ५ धनुश्चदि
व्यंपुरटोपनद्धंतूणावरिक्तौकवचंचदिव्यं पितामहस्तस्यददौचमालामम्लान
पुष्पांजलजंचशुक्रः ६

वर्णं तूणौइषुधीअरिक्तौअक्षय यशरौ पितामहःप्रह्लादःज
लजंशंखं ६७

विप्रैरर्जितः संपादितोयोधनार्थोयुद्धपरिकरोयस्य तैरेवकल्पितंस्वस्त्ययनंमं
गलवाचनादियस्य आमंत्र्यपृष्ट्वा ७ अथारुह्यराजेतिद्वयोरन्वयः सुस्रग्धरः शो

एवंसविप्रार्जितयोधनार्थस्तैः कल्पितस्वस्त्ययनोयथविधान् प्रदक्षि
णीकृत्यकृतप्रणामः प्रल्हादमामंत्र्यनमश्चकार ७ अथारुह्यरथं
दिव्यंभृगुदत्तंमहारथः सुस्रग्धरोथसंनह्यधीरः खड्गीध्रुतेषुधिः ८
हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः रराजरथमारूढोधिष्ण्यस्थ
इवहव्यवाट् ९

भनमालाधरः ८ हेमांगदाभ्यांलसंतौबाहूयस्यधिष्ण्यस्थः भवनेप्रज्वलितः कुंडस्थः
आहवनीयइवेतिवा १७

तुल्यमैश्वर्यंबलंचश्रीश्चयेषांतैर्दैत्ययूथपैर्नोययाविनिद्धयोरन्वयः परिधीन्दिशः १० स्वर्द्धांअतिसमृद्धां ११ धिक्ग्राम्यसुखंतथाविधांपुरीं अकस्मादेवपरित्य

बल

तुल्यैश्वर्यवयःश्रीभिः स्वयूथैर्दैत्ययूथपैः पिबद्भिरिवखंदृग्भिर्दहद्भिःपरिधीनिव १० रतोविकर्षन्महतीमासुरीध्वजिनींविभुः ययाविंद्रपुरींस्वर्द्धांकंपयन्निवरोदसी ११ रम्यामुपवनोद्यानैःश्रीमद्भिर्नंदनादिभिः कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः १२

न्यैद्रादयःपलायिताइतिवैराग्यार्थमिंद्रपुरीमनुवर्णयति रम्यामिति साद्धैरेकादशभिः उपवनानिफलप्रधानानिनिकट्यानिवा उद्यानानिपुष्पप्रधानानिदूरस्थानिचतैःरम्यां कूजंतिविहंगमिथुनानियेषुगायंतोमत्तामधुव्रतायेषु

१२

प्रवालादीनामुरुभारोयासुलाः शाखायेषांतेअमरद्रुमायेषुतैः यत्रयासुसुरसेवि
ताः प्रमदाः क्रीडंतिताः हंसादिकुलैराकुलाआसानलिन्यः सरांसियत्रयेषुसंति तैः

प्रवालफलपुष्पोरुभारशाखामरद्रुमैः हंससारसचक्राह्वकारंडव
कुलाकुलाः नलिन्योयत्रक्रीडंतिप्रमदाः सुरसेविताः १३ आका
शगंगयादेव्यावृतांपरिधिभूतया प्राकारेणाग्निवर्णेनसाट्टाले
नोन्नतेनच १४

रुपवनोद्यानैरम्यामितिपूर्वेणैवान्वयः १३ किंच परिखाभूतयाआकाशगंग
यावृतां प्राकारेणसौवर्णेनचावृतां अट्टालाः प्राकारोपरिरचितान्युन्नतानियुद्धस्था
नानितत्सहितेन १४

रुक्मपट्टानिकपाटानियेषुतैर्द्वारैरवांतरैः स्फाटिकमयैर्गोपुरैश्चपुरद्वारैर्जुष्टां विभक्ताः प्रपथाः राजमार्गाः यस्यां १५ सभाउपवेशस्थानानिचत्वराण्यंगणानि

रुक्मपट्टकपाटैश्चद्वारैः स्फटिकगोपुरैः जुष्टांविभक्तप्रपथांविश्वकर्मविनिर्मितां १५ सभाचत्वररथ्याढ्यांविमानैर्न्यर्बुदैर्युतां श्रृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः १६

रथ्याउपमार्गाः तैराढ्यांसंपन्नां न्यर्बुदंदशकोटयः तैर्गणनीयैरनंतैर्विमानैर्युतां वज्रविद्रुममय्योवेदयोयेषुतैः श्रृंगाटकैश्चतुष्पथैर्युतां १६ श्रीरामचंद्राय

नित्यंवयस्तारुण्यंरूपंचसौकुमार्यंयासांताःरूपवन्नार्यःस्वलंकृताःस्त्रियःयत्रय
स्यांभ्राजंते १७ सुरस्त्रीणांकेशेभ्योविभ्रष्टानांनवसौगंधिकस्त्रजामामोदं १८ हेम

यत्रनित्यवयोरूपाःश्यामाविरजवाससः भ्राजंतेरूपवन्नार्यअर्चि
र्भिरिवबन्हयः १७ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्त्रजां यत्रा
मोदमुपादायमार्गआवातिमारुतः १८ हेमजालाक्षनिर्गछद्धूमे
नागरुगंधिना पांडुरेणप्रतिछन्नमार्गेयांतिसुरप्रियाः १९

गवाक्षेभ्योनिर्गछताधूमेनसुरप्रियाअप्सरसः १९ श्रीरामचंद्रायनमोनमः ७

मुक्तामयैर्वितानैः मणिहेममयैः केतुभिश्च ध्वजैर्नानापताकायुक्ताभिर्वलभीभिश्च
विमानानां पुरोभागैः आवृतां बभासा वैमानिकस्त्रीणां कलगीतैर्मंगलां २० उपदेवा

मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृतां शिखं
डिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलां २० मृदंगशं
खानकडिंडिमस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः नृत्यैः सवाद्यैरु
पदेवगीतकैर्मनोरमां स्वप्रभया जितग्रहां २१

नां गंधर्वादीनां गीतकैश्च मनोरमां जिता प्रभा साक्षाद्दीस्य धिष्ठात्री देवता यया तां अ
न्यैरजितप्रभामिति वा पाठांतरे जिताः ग्रहाः सूर्यादयो यया २१ श्रीरामकृष्णाभ्यां ०

यत्यां २२ एतन्ययासेनया २३ २४ केनहेतुनाएवंतेजसाउर्ज्जितआसीत् २५

यान्नव्रजंत्यधर्मिष्ठाः खलाभूतद्रुहःशठाः मानिनःकामिनोलुब्धा
एभिर्हीनाव्रजंतियत् २२ तांदेवधानींसवरूथिनीपतिर्बहिःसमं
तादुरुधेएतन्यया आचार्यदत्तंजलजंमहास्वनंदध्मौप्रयुंजन्भ
यमिंद्रयोधिनां २३ मघवांस्तदाभिप्रेत्यबलेःपरमसुद्यमं सर्वदे
वगणोपेतोगुरुमेतउवाचह २४ भगवन्नुद्यमोभूयान्बलेर्नःपूर्ववै
रिणः अविषह्यमिमंमन्येकेनासीत्तेजसोर्ज्जितः २५-श्रीरामजी

श्रीगोपालकृष्णायनमः

प्रतिषोढुं अपाकर्तुं २६ यतः कारणादेतस्य अजआदि यत अजआदेः एतस्यसमु

नैनंकश्चित्कुतोवापिप्रतिषोढुमधीश्वरः पिबन्निवमुखेनेदंलिहन्नि
वदिशोदश दहन्निवदिशोह्यग्निःसंवर्त्ताग्निरिवोत्थितः २६ ब्रूहि कारण
मेतस्यदुर्धर्षत्वस्यषड्विधोः ओजःसहोबलंतेजो यतएतत्समुद्यमः २७
श्रीगुरुरुवाच जानामिमघवच्छत्रोरुन्नतेरस्यकारणं शिष्यायोपभृतं
तेजोभृगुभिर्ब्रह्मवादिभिः २८ भवद्विधोभवान्वापिवर्जयित्वेश्वरंह
रिं नास्यशक्तःपुरःस्थातुंकृतांतस्ययथाजनाः २९

यमः २७ उपभृतंसंचितं २८ २९ श्रीरामचंद्रायनमः

तत्रोचितंमंत्रमाह तस्मायूयंत्रिविष्टपमुत्सृज्य निलयमदर्शनंयातयतःकालात् ३० केनास्यविपर्ययःस्यादित्यतआह एषइति विप्राणांबलेनउदर्कंउत्तरमधिकंफलंयस्य

तस्मान्निलयमुत्सृज्ययूयंसर्वेत्रिविष्टपं॥यात कालंप्रतीक्षंतोयतःश त्रोर्विपर्ययः ३० एषविप्रबलोदर्कःसंप्रत्यूर्जितविक्रमः एषामेवाव मानेनसानुबंधोविनंक्ष्यति ३१ एवंसुमंत्रितार्थास्तेगुरुणार्थानुदर्शि ना हित्वात्रिविष्टपंजग्मुर्गीर्वाणाःकामरूपिणः ३२

सः ३१ सुमंत्रितःअर्थःकार्यंतेषांते निलयंजग्मुः ३२

३३ एवंप्राप्तमिंद्रपदंस्थिरीकर्तुंअयाजयन् अनुव्रतंअनुवर्त्तिनं ३४ ३५ द्विजदेवै

देवेष्वथकिलीनेषुबलिर्वैरोचनः पुरीं देवधानीमधिष्ठायवशंनिन्येजग
त्रयं ३३ तंविश्वजयिनंशिष्यंभ्रगवः शिष्यवत्सलाः शतेनहयमेधाना
मनुव्रतमयाजयन् ३४ ततस्तदनुभावेनभुवनत्रयविश्रुतां कीर्तिंदिक्षु
वितन्वानः सरेजेउडुराडिव ३५ बुभुजेचश्रियंऋद्धांद्विजदेवोपलंभितां
कृतकृत्यमिवात्मानंमन्यमानोमहामनाः ३६ इतिश्रीभागवतेम० अ०
पंचदशोध्यायः १५

ब्राह्मणैरुपलंभितांप्रापितां ३६ इतिश्री० टी० पंचदशः

षोडशेपुत्रनाशेनशोचंत्याअदितेः पतिः प्रार्थितः कश्यपः प्राहपयोव्रतमितीर्यते १

इदानींश्रीवामनावतारप्रसंगमाह एवमित्यादियावत्समाप्ति नष्टेषुअदृश्येषुसत्सु
१ २ सःकश्यपः पत्नीमिदमाह ३ दीनवदनत्वादिकमालक्ष्यबहुधाविकल्पयन्

श्रीशुक उवाच ॥ एवंपुत्रेषुनष्टेषुदेवमातादितिस्तदा हृतेत्रिविष्टपेदैत्यैः पर्यतप्यदना
थवत् १ एकदाकश्यपस्तस्याआश्रमंभगवानगात् निरुत्सवंनिरानंदंसमाधेर्विर
तश्चिरात् २ सपत्नींदीनवदनांकृतासनपरिग्रहः सभाजितोयथान्यायमिदमाह
कुरूद्वह ३ अप्यभद्रंनविप्राणांभद्रेलोकेधुनागतं नधर्मस्यनलोकस्यमृत्योःछंदा
नुवर्तिनः ४

पृच्छति अप्यभद्रमितिस प्तभिः हेभद्रेमृत्योः छंदमिच्छामनुवर्तंत
इतितथामृत्युवशावर्तिनोजनस्येत्यर्थः ४ श्रीगोपालकृष्णाभ्यांनमोनमः ॥७॥

अपिवाकिंवा गृहेषुधर्मादिः किंचिदकुशलमितिकाकाप्रश्नः यत्रषुयेगृहेषुअयो
गिनामपियोगः स्वधर्मादिनायोगफलंभवति ५ किंवात्वयाःपूजिताएवाभ्येत्य

१४७ अपिवाकुशलंकिंचित्गृहेषुगृहमेधिनि धर्मस्यार्थस्यकामस्ययत्रयोगोत्ययो
गिनां ५ अपिवाःतिथयोभ्येत्यकुटुंबासक्तयात्वया गृहादपूजितायाताः प्रत्युत्था
नेनवाक्कचित् ६ गृहेषुयेष्वतिथयोनार्चिताःसलिलैरपि यदिनिर्यांतितेनूनंफेरु
राजगृहोपमाः ७ अप्यग्नयश्चवेलायांनहुताहविषासति त्वयोद्विग्नधियाभद्रेप्रो
षितेमयिकर्हिचित् ८ यत्पूजयाकामदुघान्यातिलोकान्गृहान्वितः ब्राह्मणोग्नि
श्चवैविष्णोः सर्वदेवात्मनोमुखं ९

गृहायाताः ६ नार्चिताःसंतोयदिनिर्यांतितेगृहाः

छं

फेरुराजः शृगालनाथः तदीयविवर तुल्याः ७ वेलायांहोमकालेकर्हिचिन्नहुताः किं
८ ९ भवत्याः आत्मानंमनः अस्वस्थमप्रकृतिस्थंलक्षणैर्मुखम्लान्यादिभिः लक्षया

अपिसर्वेकुशलिनस्तवपुत्रामनस्विनि लक्षयेऽस्वस्थमात्मानं भवत्यालक्षणैरहं १०
अदितिरुवाच भद्रंद्विजगवांब्रह्मन् धर्मस्यास्यजनस्यच त्रिवर्गस्यपरंक्षेत्रंगृह
मेधिन्गृहाइमे ११ अग्नयोऽतिथयोभृत्याभिक्षवोयेचलिप्सवः सर्वंभगवतोब्रह्म
न्ननुध्यानान्नरिष्यति १२

मि १० अस्वास्थ्यकारणमन्यदस्तीतिवक्तुंतत्पृष्टम
भद्रादिकंनास्तीत्याह भद्रमितिद्वाभ्यां इमेगृहाः त्रिवर्गस्यपरंक्षेत्रंजङ्गमस्थानंत्रि
वर्गोऽपिपथावद्वर्धतइत्यर्थः ११ भगवतस्तवानुध्यानंयन्मयाक्रियतेतस्मात्अग्न
योऽतिथयइत्यादिसर्वंनरिष्यतिनहीयते १२

प्रस्तुतंविज्ञापयितुमाह कोन्विति १३ संपाद्यंकाममाह नवैवेतिचतुर्भिः १४ सपत्नैर्दै

कोनुमेभगवन्कामोनसंपद्येतमानसः यस्याभवान्प्रजाध्यक्षएवंधर्मान्प्रभाष
ते १३ तवैवमारीचमनःशरीरजाः प्रजाइमाःसत्वरजस्तमोजुषः समोभवांस्तास्वसु
रादिषुप्रभोतथापिभक्तान्भजतेमहेश्वरः १४ तस्मादीशभजंत्यामेश्रेयश्चिंतयसु
व्रत हृतश्रियोहृतस्थानान्सपत्नैःपाहिनःप्रभो १५ परैर्विवासितासाहंमग्नाव्यस
नसागरे ऐश्वर्यंश्रीर्यशःस्थानंहृतानिप्रबलैर्मम १६ यथातानिपुनःसाधोप्रपद्येर
न्ममात्मजाः तथाविधेहिकल्याणंधियाकल्याणकृत्तम १७

त्यैर्हृताश्रीर्येषां हृतंस्थानंयेषामिति पुत्राभिप्रायेणबहुवचनं १५ १६ १७ श्री०

कः कश्यपः प्रथमं तावत्पुत्रस्नेहं त्याजयितुं विस्मयव्याजेन तत्त्वमुपदिशति अहोऽइति
सार्द्धेन १८ १९ अत्रा[illegible] परितुष्यंतीं प्रत्याह उपतिष्ठस्वेति सार्द्धेन २० नन्वेवंभूतका

सुक उ॰ एवमभ्यर्थितोदित्या कश्यपस्तामाह स्मयन्निव अहो मायाबलं विष्णोः स्नेहबद्धमि
दं जगत् १८ क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः कस्य के पतिपुत्राद्या मोह ए
व हि कारणं १९ उपतिष्ठस्व पुरुषं भगवंतं जनार्दनं सर्वभूतगुहावासं वासुदेवं जगद्गु
रुं २० स विधास्यति ते कामान् हरिर्दीनानुकंपनः अमोघा भगवद्भक्तिर्नेतरेति मति
र्मम २१ अदितिरु॰ केनाहं विधिना ब्रह्मन्नु[illegible]पस्थास्ये जगत्पतिं यथा मे सत्यसंकल्पो
विदध्यात्स मनोरथं २२ मन्त्राभि[?]र्हेतुर्देवतांतरसेवा प्रसिद्धा तत्राह अमोघेति २१ यथा
च मे मनोरथं विदध्यात् २२

यथाच्चमेआशुतुष्यतितथातत्सेवाप्रकारमादिश २३ मेमयापृष्टः पद्मजोयद्व्रत

आदिशत्वंद्विजश्रेष्ठविधिंतदुपधावनं आशुतुष्यतिमेदेवः सीदंत्साः सहपुत्रकैः २३
कश्यपउ० एतन्मेभगवान्पृष्टः प्रजाकामस्यपद्मजः यदाहतेप्रवक्ष्यामिव्रतंकेश
वतोषणं २४ फाल्गुनस्यामलेपक्षेद्वादशाहंपयोव्रतः अर्चयेदरविंदाक्षंभक्त्यापरम
यान्वितः २५ सिनीवाल्यांमृदालिप्यस्नायात्क्रोडविदीर्णया यदिलभ्येतवैस्रोतस्ये
तंमंत्रमुदीरयेत् २६ त्वंदेव्यादिवराहेणरसायाः स्थानमिछता उद्धृतासिनमस्तु
भ्यंपाप्मानंमेप्रणाशय २७

माहएतत्तेप्रवक्ष्यामीत्यन्वयः २४ अमलेशुक्ले २५ तत्रादौपूर्वे
द्युः कृत्यमाह सिनीवाल्यामित्यादिनाब्रह्मचार्यंतद्वाभ्यामित्यंतेनग्रंथेन यदिलभ्येत
तर्हिक्रोडविदीर्णयावन्यवराहोत्खातया आलिप्य २६

तत्रमंत्रः त्वंदेवीति हेदेवित्वंरसायाःउद्धतासि २७ निर्वर्त्तितआत्मनियमोनित्यनैमि
त्तिकोयेन २८ तत्रावाहनादौनवमंत्रानाह नमस्तुभ्यमिति पायादौ विशेषतस्तुद्वा

निर्वर्त्तितात्मनियमोदेवमर्चेत्समाहितः अ र्चायांस्थंडिलेसूर्येजलेवह्नौगु
रावपि २८ नमस्तुभ्यंभगवतेपुरुषायमहीयसे सर्वभूतनिवासायवा
सुदेवायसाक्षिणे २९ नमोव्यक्तायसूक्ष्मायप्रधानपुरुषायच चतु
र्विंशद्गुणज्ञायगुणसंख्यानहेतवे ३० दशाक्षरंवक्ष्यति २९ चतुर्विंशति
गुणास्तत्त्वानितानिजानातीतितथातस्मै गुणसंख्यानस्यहेतवेसांख्यप्रवर्त्तका
य ३० श्रीगुरुनाथाय

द्वा

एवंसामान्यतोनत्वागुणवतारान्प्रणमति त्रिभिः तत्रादौमंत्रोक्तयज्ञरूपेणवि
ष्णोःप्रणामोनमइति द्वेशीर्षेयस्यत्रयःपादायस्यतंतवेफलविस्तारकाय त्रय्यांवि
द्यायामात्मायस्येतित्रिधाबद्धस्यस्यार्थउक्तः तथाचमंत्रः चत्वारिशृंगात्रयोअ
स्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवे

नमोद्विशीर्ष्णेत्रिपदेचतुःशृंगायतंतवे सप्तहस्ताययज्ञायत्रयीविद्यात्म
नेनमः ३१

शेति मार्गमुज्ज्वदाल्लुनः सोयमभो सैर्यथायथं विष्णुस्तुयज्ञरूपेणस्तूयते
नेनतत्वतः तथाचयास्कः चत्वारिशृंगेतिवेदावाएतउक्तास्त्रयोअस्यपादाइतिसवना
नित्रीणिद्वेशीर्षेप्रायणीयोदयनीयेसप्तहस्तासःसप्तछंदांसित्रिधाबद्धस्त्रेधाबद्धोमं

त्रब्राह्मणकल्पैर्वृषभोरोरवीतिरोरवणमस्यसवनक्रमेणऋग्भिर्यजुर्भिः सामभिर्य
देनमृग्भिः शंसंतियजुर्भिर्यजंतिसामभिः स्तुवंतीति ३१ ३२ प्राणायसूत्रात्मने यो

नमः शिवायरुद्रायनमः शक्तिधरायच सर्वविद्याधिपतयेभूतानांपत
येनमः ३२ नमोहिरण्यगर्भायप्राणायजगदात्मने योगैश्वर्यशरीराय
नमस्तेयोगहेतवे ३३ नमस्तआदिदेवायसाक्षिभूतायतेनमः नाराय
णायऋषयेनरायहरयेनमः ३४ नमोमरकतश्यामवपुषेधिगतश्रिये
केशवायनमस्तुभ्यंनमस्तेपीतवाससे ३५ त्वंसर्ववरदः पुंसांवरेण्यवर
दर्षभ अतस्तेश्रेयसेधीराः पादरेणुमुपासते ३६

गैश्वर्यंशरीरंयस्य ३३ ३६

अधिगताप्राप्ताश्रीर्येननतस्मै तत्पादपद्मयोः आमोदंस्पृहयंतइवदेवाश्चश्रीश्चयम
नवर्त्ततसमेप्रसीदतु ३७ आवाहनेनपुरस्कृतंसम्मानितं ३८ ३९ पयसिश्रितंपक्वं

अन्ववर्त्ततयंदेवाःश्रीश्चतत्पादपद्मयोः स्पृहयंतइवामोदंभगवान्मेप्रसीदतां ३७
एतैर्मंत्रैर्हृषीकेशमावाहनपुरस्कृतं अर्चयेच्छ्रद्धयायुक्तःपाद्योपस्पर्शनादिभिः ३८ अ
र्चिताग्रंधमाल्याद्यैःपयसास्नापयेद्विभुं वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ३९
गंधपुष्पादिभिश्चार्चेत्द्वादशाक्षरविद्यया ३९ श्रितंपयसिनैवेद्यंशाल्यन्नंविभवेस
ति ससर्पिःसगुडंदत्वाजुहुयान्मूलविद्यया ४०
पायसं मूलविद्ययाद्वादशाक्षरेणैव ४०

४१ पूर्वोक्ताभिरन्याभिश्चस्तुतिभिः ४२ तस्यशेषांनिर्माल्यं द्वौअवरौयेषांतान् असंभवे द्वा[illegible]वपिभोजयेदित्यर्थः ४३ सभाजितैस्तैरनुज्ञातः सन् शेषंबंधुभिः सहितः तस्यांरा

निवेदितंतद्भक्तायदद्याद्भुंजीतवा स्वयं दत्वाऽऽचमनमर्चित्वातांबूलंचनिवेदये त् ४७ जपेदष्टोत्तरशतंस्तुवीतस्तुतिभिःप्रभुं कृत्वाप्रदक्षिणंभूमौप्रणमेदंडव न्मुदा ४८ कृत्वाशिरसितच्छेषांदेवमुद्वासयेत्ततः अवरान्भोजयेद्विप्रान्पा यसेनयथोचितं ४९ भुंजीततैरनुज्ञातः शेषंसेष्टःसमाहितः ब्रह्मचार्यथ तद्रात्र्यांश्वोभूतेप्रथमेहनि ५०

थ्यांब्रह्मचारीसन् श्वो [illegible] भूतेप्रभातेसति ५५

पयएवभक्ष आहारोयस्य ४६ ४७ अधः स्वप्नंशयनं ४८ ४९ पंचकैः पंचामृतैः ५०

स्नातः शुचिर्यथोक्तेनविधिनासुसमाहितः पयसास्नापयित्वार्चेयावद्भक्तसमाप
नं ४५ पयोभक्षोव्रतमिदंचरेद्विष्ण्वर्चनादृतः पूर्ववज्जुहुयादग्निंब्राह्मणांश्चा
पिभोजयेत् ४६ एवंत्वहरहः कुर्यात्द्वादशाहंपयोव्रतं हरेराराधनंहोममर्हणं
द्विजतर्पणं ४७ प्रतिपद्दिनमारभ्ययावच्छुक्लात्रयोदशी ब्रह्मचर्यमधः स्वप्नं
स्नानंत्रिषवणंचरेत् ४८ वर्जयेदसदालापंभोगानुच्चावचांस्तथा अहिंस्रः
सर्वभूतानांवासुदेवपरायणः ४९ त्रयोदश्यामथोविष्णोः स्नपनंपंचकैर्विभोः
कारयेच्छास्त्रदृष्टेनविधिनाविधिकोविदैः ५० पूजांचमहतींकुर्याद्वित्तशाठ्यवि
वर्जितः चरुंनिरूप्यपयसिशिपिविष्टायविष्णवे ५१

५२ ५३ ५४ ५५ ५६ ५७

श्रितेनतेनपुरुषंयजेतसुसमाहितः नैवेद्यंचातिगुणवद्दद्यात्पुरुषतुष्टिदं ५२ आ
चार्यंज्ञानसंपन्नंवस्त्राभरणधेनुभिः तोषयेदृत्विजश्चैवतद्धिह्याराधनंहरेः ५३
भोजयेत्तान्गुणवत्तासदन्नेनसुचिस्मिते अन्यांश्चब्राह्मणान्शक्त्यायेचतत्र
समागताः ५४ दक्षिणांगुरवेदद्याद्दत्विग्भ्यश्चयथार्हतः अन्नाद्येनाश्वपाकांश्च
प्रीणयेत्समुपागतान् ५५ भुक्तवत्सुचसर्वेषुदीनांधकृपणेषुच विष्णोस्तत्प्री
णनंविद्वान्भुंजीतसहबंधुभिः ५६ नृत्यवादित्रगीतैश्चस्तुतिभिःस्वस्तिवाच
कैः कारयेत्तत्कथाभिश्चपूजांभगवतोऽन्वहं ५७ श्रीरामचंद्रायनमः ॥ ८

मयाचतेसमुदाहृतं ५८ ५९ सर्वयज्ञाख्योयंयज्ञःसर्वव्रतमितिस्मृतमेतद्व्रतं

एतत्पयोव्रतंनामपुरुषाराधनंपरं पितामहेनाभिहितंमयातेसमु
दाहृतं ५८ त्वंचानेनमहाभागेसम्यक्चीर्णेनकेशवं आत्मनाशुद्धभा
वेननियतात्माभजाऽव्ययं ५९ अयंवैसर्वयज्ञाख्यःसर्वव्रतमितिस्मृतं
तपःसारमिदंभद्रेदानंचेश्वरतर्पणं ६० तएवनियमाःसाक्षात्तएवचयमो
त्तमाः तपोदानंव्रतंयज्ञोयेनतुष्यत्यधोक्षजः ६१ तस्मादेतद्व्रतंभद्रेप्रय
ताश्रद्धयाचर भगवान्परितुष्टस्तेवरानाशुविधास्यति ६२ इतिश्री०
६० ६२ इतिअध्याय: अष्टमस्कंधेपयोव्रतकथनंनामषोडशः १६ १६ ५७

ततःसप्तदशोऽदित्याह्नेतेनास्मिन्व्रतेहरिः तत्कामपूरणायादौतत्पुत्रोऽभूददितीर्यते १

शुकउवाच इत्युक्तासादितीराजन्स्वभर्त्राकश्यपेनवै अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता १ चिंतयंत्येकयाबुद्ध्यामहापुरुषमीश्वरं प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रयाबुद्ध्याभगवत्यखिलात्मनि वासुदेवे समाधायचचारहपयोव्रतं ३ तस्याःप्रादुरभूत्तातभगवानादिपूरुषः पीतवासाश्चतुर्बाहुःशंखचक्रगदाधरः ४ तंनेत्रगोचरंवीक्ष्यसहसोत्थायसादरं ननामभुविकायेनदंडवत्प्रीतिविह्वला ५

१ २ ३ ४ ५ ५

प्रीतिविह्वलत्वाद्देवसाबद्धांजलिः सतीस्थिताकेवलं ईडितुंपुनर्नोत्सेहेनशशाकअपि
तुतूष्णींबभूव कथंभूताआनंदजलैराकुलेईक्षणेयस्याःपुलकैःआकुलाआकृतिर्देहो

सोत्थायबद्धांजलि रीडितुंस्थितानोत्सेहआनंदजलाकुलेक्षणा बभू
वतूष्णींपुलकाकृतिस्तदातद्दर्शनात्युत्सवगात्रवेपथुः ६ प्रीत्याशनै
र्गद्गदयागिराहरिंतुष्टावसादेव्य दितिःकुरूद्वह उद्वीक्षतीसापिबती
वचक्षुषारमापतिंयज्ञपतिंजगत्पतिं ७

यस्याः तस्यहरेर्दर्शनेननयःअत्युत्सवः प्रहर्षस्तेनगात्रेषुअवयवेषुकंपोयस्याः ६ तुष्टा
व पिबतीवोद्वीक्षमाणेतिचक्रियाभेदात्सेत्सस्यपदस्यद्विरुक्तिरदोषः ७ ५ ७

अयत्नतोविनिर्ज्जित्यदैत्यानस्पूर्जितानपि भक्तान्रक्षितुमीशस्त्वमित्यस्तौददि
तिस्त्रिभिः यज्ञेशेत्यादिदशभिः संबोधनैस्तवाशक्यंकिमपिनास्तीतिवदंतीप्रा
र्थयते शंनः कृधिकुरु यतोदीनानांनाथोसित्वं तीर्थंश्रवः कीर्त्तिर्यस्य श्रवणमे

॥अदितिरुवाच यज्ञेशयज्ञपुरुषाच्युततीर्थपादतीर्थश्रवःश्र
वणमंगलनामधेय आपन्नलोकवृजिनोपशमोदयशंनः कृधी
शभगवन्नसिदीननाथः ८

दया

वमंगलंयस्यतन्नामधेयंयस्य आपन्नानांशरणंगतानां
लोकानांवृजिनोपशमायउदयोयस्य ८ श्रीवामनावताराख्यांनमोनमः ॥७॥ ७

भूम्नेमहतेनमः महत्वेहेतवः विश्वाय विश्वस्यभवनास्थितिसंयमनार्थंस्वैरंगृही
ताःपुरुशक्तेर्मायायागुणायेनतस्मैतथाऽपिस्वस्थायअप्रच्युतस्वरूपायकृतः ॥

विश्वायविश्वभवनास्थितिसंयमायस्वैरंगृहीतपुरुशक्तिगुणा
यभूम्ने स्वस्थायशश्वदुपबृंहितपूर्णबोधव्यापादितात्मतम
सेहरयेनमस्ते १

शश्वदुपबृंहितः नित्योर्जितोयः पूर्णोबोधस्तेनव्यापादितंनिरस्तं आत्मनितमोमायालक्षणंयेनतस्मै १ नमोभगवतेनमोनमः श्रीकृष्णायन

अस्मदीयमनोरथपूरणमीषत्करमेव न वेति कैमुतिकन्यायेनाह आयुःपरंब्रह्माद्यायुः
पुनरपि द्योश्च भूश्च रसातलं च द्योभूरसाः द्यौरिति पृथक्पाठे भूश्च रसाश्च बिलस्वर्गौ

आयुःपरंवपुरभीष्टमतुल्यलक्ष्मीर्द्योभूरसाःसकलयोगगुणास्त्रिवर्गः ज्ञा
नंचकेवलमनंतभवंतितुष्टात्त्वत्तोनृणांकिमुसपत्नजयादिराशीः १० श्री
शुक उ० अदित्यैवंस्तुतोराजन्भगवान्पुष्करेक्षणः क्षेत्रज्ञःसर्वभूतानामि
तिहोवाचभारत ११

इतिविग्रहः रसेतिपाठेत्रीणिपदानि सकलायोगगुणाःअणिमादयः १० क्षेत्रज्ञः
अंतर्यामी ११

सपत्नैर्हृताश्रीर्येषांतेषांस्वधामतश्च्यावितानांचपुत्राणांसंबंधियत्तद्वस्याश्चिर

श्रीभगवानुवाच देवमातर्भवत्यामेविज्ञातंचिरकांक्षितं यत्सपत्नैर्हृतश्री
णांच्यावितानांस्वधामतः १२ तान्विनिर्जित्यसमरेदुर्मदानसुरर्षभान्
प्रतिलब्धजयश्रीभिःपुत्रैरिछस्युपासितुं १३ इंद्रज्येष्ठैःस्वतनयैर्हता
नांयुधिविद्विषां स्त्रियोरुदंतीरासाद्यद्रष्टुमिछसिदुःखिताः १४

मत्कांक्षितंमयाविज्ञातं १२ कांक्षितमेवाह तानितित्रिभिः प्रतिलब्धोजयस्तस्याश्री
श्रयैःतैःपुत्रैःसहउपासितुं एकत्रस्थातुमिछसि १२ श्रीकृष्णायपरमात्मने॰नमः

प्रसादात्त्वं यशस्त्र्श्रीश्र्यैः तान् १५ अपारणीयाः अनतिक्रमणीयाः यद्यस्मात् अनु
कूलईश्वरः कालोयेषांतैर्विप्रैर्गुप्ताः रक्षिताः अनुकूलैरीश्वरैः समर्थैर्विप्रैर्गुप्ताइ

आत्मजान्सुसमृद्धांस्त्वंप्रसादात्तयशः श्रियः नाकपृष्ठमधिष्ठाय
क्रीडतोद्रष्टुमिच्छसि १५ भायोऽधुनातेसुरपूयनाथाः अपारणीयाइति
देविमेमतिः यतेऽनुकूलेश्वरविप्रगुप्तानतिक्रमस्तत्रसुखंददाति १६
तथाप्युपायोममदेविचिंत्यः संतोषितस्यव्रतचर्ययाते ममाऽर्चनं
नार्हतिगंतुमन्यथाश्रद्धानुरूपफलहेतुकत्वात् १७

तिवा १६ ममम यापिंत्य
एव तत्रहेतुः संतोषितस्येत्यादिना श्रद्धानुरूपंइच्छानुसारेणफलहेतुत्वात् १७ ५

मारीचस्यतपसिअधिष्ठायस्थितःसन्गोप्तास्मिपालयिष्यामि १८ अतःपतिमु

त्वयाःर्चितश्चाहमपत्यगुप्तयेपयोव्रतेनानुगुणंसमीडितः स्वांशे
नपुत्रत्वमुपेत्यतेसुतान्गोप्तास्मिमारीचतपस्यधिष्ठितः १८ उ
पधावतिंभद्रेप्रजापतिमकल्मषं मांचभावयतीपत्यावेवंरूपम
वस्थितं १९ नैतत्परस्माआख्येयंपृष्टयापिकथंचन सर्वंसंपद्य
तेदेविदेवगुह्यंसुसंवृतं २०

प

पधावभजस्व १९ देवानांगुह्यंरहस्यंसर्वंसुसंवृ
तंगुह्यंसत्संपद्यतेसिध्यति २०

प्रभोर्हरेरात्मनिजन्मलब्ध्वा २१ अवितथमीक्षणंदृष्टिर्यस्यसः २२ अनिलोयथास
र्वत्रसमोपिदारुणिसंघर्षेणवनदाहकमग्निमाधत्तेएवंस्वयंपुत्रेषुसमोऽपिदैत्यपक्ष

श्रीशुकउवाच एतावदुक्त्वाभगवांस्तत्रैवांतरधीयत अदितिर्दुर्ल
भंलब्ध्वाहरेर्जन्मात्मनिप्रभोः उपाधावत्पतिंभक्त्यापरयाकृतकृ
त्यवत् २१ सवैसमाधियोगेनकश्यपस्तदबुध्यत प्रविष्टमात्म
निहरेरंशंह्यवितथेक्षणः २२ सोऽदित्यांवीर्यमाधत्ततपसाचिर
संभृतं समाहितमनाराजन्दारुण्यग्निंयथाऽनिलः २३ ७

क्षपणवीर्य्यमाधत्तइत्यर्थः २३ श्रीकृष्णपरमात्मनेनमः रामरामश्रीरामराम॥

धिष्ठितं अधिष्ठायास्थितं समीड्ये तुष्टाव इत्यर्थः २४ २५ अदितेरेव पूर्वस्मिन्जन्मनि पृश्निरिति नाम तस्याः गर्भाअर्भकाय वेदा गर्भे यस्य यद्वा वेदानां गर्भाय वेदेषु प्रकाशमानायेत्यर्थः त्रयो लोका नाभौ यस्य सः त्रिणाभः तस्मै त्रयाणां लोकानां पृष्ठे

अदित्याधिष्ठितं गर्भे भगवंतं सनातनं हिरण्यगर्भो विज्ञाय समीड्ये गुह्यनामभिः २४ ब्रह्मोवाच जयोरुगाय भगवन्नुरुक्रम नमोस्तु ते नमो ब्रह्मण्यदेवाय त्रियुगाय नमो नमः २५ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे त्रिणाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे २६

उपरिस्थिताय शिपिशब्देन पशवो जीवाः तेषां तर्यामितया प्रविष्टाय यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः यद्वा शिपयो रश्मयस्तैर्वेष्टिता येत्यर्थः तथापि विष्णवे व्यापिने २६

अंतःपतितंतृणादियथागंभीरंस्त्रोतःआक्षिपतेआकर्षति तथाकालात्माभवान्
विश्वमाक्षिपति २७ संभविष्णुःउत्पादशीलोऽसि अयंभावः नह्येवंभूतस्यतवजन्मा

त्वमादिरंतोभुवनस्यमध्यमनंतशक्तिंपुरुषंयमाहुः कालोभवानाक्षिप
तीशविश्वंस्त्रोतोयथांतःपतितंगभीरं २७ त्वंवैप्रजानांस्थिरजंगमानां
प्रजापतीनामसिसंभविष्णुः दिवौकसांदेवदिवश्च्युतानांपरायणंनौ
रिवमज्जतोप्सु २८ इतिश्रीभागवतेम॰वामनावतारोनामसप्तदशः
१७

दिसंभवः किंतु देवानांप्रजापतीनांप्रजानांपरमाश्रयत्वेन तत्कार्यसाधनायावता
रोयं अतोस्मान्स्वर्गच्युतान्पुनःस्वर्गेस्थापयेति २८ इतिश्रीभा॰दी॰सप्तदशः
१७

ततस्त्वष्टादशोभूत्वावामनःसत्कृतोऽखिलैः यज्ञंगतस्ततस्तेनसत्कृतोक्तोवरान्वृणु १ इत्थंविरिंच्येनस्तुतंकर्मचदेवकार्यलक्षणंवीर्यंचप्रभावोयस्यसहरिरदित्यांप्राडुर्ब

श्रीशुकउवाच॥ इत्थंविरिंच्यस्तुतकर्मवीर्यःप्राडुर्बभूवाऽमृतभूरदित्यां चतुर्भुजःशंखगदाब्जचक्रःपिशंगवासानलिनायतेक्षणः १

भूवेतित्रयाणामन्वयः अमृतभूःमृत्युजन्मशून्यः शंखगदाब्जचक्राण्यस्यसंतीतितथा अर्शआदित्वेनमत्वर्थीयोअच्प्रत्ययः अविसर्गपाठेसचासौपिशं[illegible]वास

ष्ठ १

भा॰अ॰
१०५

झषराजोमकरः तदाकारयोः कुंडलयोस्त्विषा उल्लसंती श्रीर्वदनांबुजेयस्य श्रीवत्सो वक्षसियस्य वलयैरंगदैश्चसहोल्लसंतिकिरीटादीनियस्य २ श्री॰ सांवनमाल

श्यामावदातोझषराज कुंडलत्विषोल्लसश्रीवदनांबुजः पुमान् श्रीवत्सवक्षावलयांगदोल्लसत्किरीटकांचीगुणचारुनूपुरः २ मधुव्रतव्रातविघुष्ट्यास्वयाविराजितः श्रीवनमालयाहरिः प्रजापतेर्वेश्मतमः स्वरोचिषाविनाशयन्कंठनिविष्टकौस्तुभः ३ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टाकृतवोगुणान्विताः द्यौरंतरिक्षंक्षितिरग्निजिह्वागावोद्विजाः संजहृषुर्नगाश्च ४

याविराजितःवेश्मगतंतमः ३ अग्निजिह्वादेवाः नगाःपर्वताः ४

तत्प्रादुर्भावसमयमाह श्रोणायामिति भाद्रपदशुक्लद्वादशी श्रवणद्वादशीति प्रसिद्धा तस्यां तत्रापि श्रोणायां श्रवणस्थे चंद्र इत्यर्थः तत्रापि श्रवणस्य प्रथमांशे ऽभिजिति नक्षत्रे तच्चस्मृत्यादर्शितं अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अधस्तात्

श्रोणायां श्रवणद्वादश्यां मुहूर्ते ऽभिजिति प्रभुः सर्वे
नक्षत्रताराद्याश्चक्रुस्तज्जन्म दक्षिणं ५ श्रीराम

श्रोणायाइति एवंविशिष्टे मुहूर्ते प्रभुः प्रादुर्बभूवेत्यर्थः किंच नक्षत्राण्यश्विन्यादीनि ताराशब्देन ग्रहा गुरुशुक्रादयः ते आद्या येषां ते सूर्यादयो ऽपि सर्वे तस्य जन्म दाक्षिण्यं दक्षिणं चक्रुः जन्ममुहूर्ते गुणावहत्वेन बभूवुरित्यर्थः ५ श्रीगोपालकृष्णाभ्यां नमः

विशेषांतरमाह यस्यां द्वादश्यां हरेर्जन्म तत्तस्यामहन्येव विष्णुः तदा च मध्यंदिनगतः स
विता तिष्ठत् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ६ शंखादयो ये तेषामन्येषां च

द्वादश्यां सविता तिष्ठन् मध्यंदिनगतो नृप विजया नाम सा प्रो
क्ता यस्यां जन्म विष्णुर्हरेः ६ शंखदुंदुभयो भेर्यो मृदंगपणवानकाः
चित्रवादित्रतूर्याणां निर्घोषस्तुमुलोऽभवत् ७ प्रीताश्चाप्सरसोऽनृत्यन् गंधर्वप्रवरा जगुः तुंबुरुर्मुनयो देवा मनवः पितरो
ऽन्वयः ८

चित्रतूर्याणां निर्घोषोऽभवत् ७ देवा मनवश्च त्यादीनां कुसुमैः समवाकिरन्निति तृतीयेना
न्वयः ८ ९

९१० ११ विस्मयांतरमाह यत्तदिति यद्वपुर्हरिरधारयत् प्रकटितवान् तेनैववपु
षामातापित्रोः संपश्यतोरेववामनो बटुर्बभूव दिव्यगतिः अद्भुतचेष्टितः स्वयंकथं

सिद्धविद्याधरगणाः सकिंपुरुषकिंनराः चारणायक्षरक्षोसिसुपर्णाभुजगोत्तमाः १
गायंतोतिप्रशंसंतोनृत्यंतोविबुधानुगाः अदितेआश्रमपदंकुसुमैः समवाकि
रन् १० दृष्ट्वादितिस्तंनिजगर्भसंभवंपरंपुमांसंमुदमापविस्मिता गृहीतदेहंनिजयो
गमायया प्रजापतिश्चाहजयेतिविस्मितः ११ यत्तद्वपुर्भातिविभूषणायुधैरव्यक्तचि
द्व्यक्तमधारयद्धरिः बभूवतेनैवसवामनोबटुः संपश्यतोर्दिव्यगतिर्यथानटः १२

भूतः अव्यक्तचिद्रूपः कथमधारयत् भातिदीप्तिः विभूषणानिचआयुधानिचतेर्व्य
क्तंयथाभवतितथा १२

कर्माणिजातकर्मादीनि १३ १४ वनस्पतिःवनानांपतिःसोमः १५ १६ पात्रिकांभि

तंबटुंवामनंदृष्ट्वामोदमानामहर्षयः कर्माणिकारयामासुःपुरस्कृत्यप्रजा
पतिं १३ तस्योपनीयमानस्यसावित्रींसवितात्रवीत् बृहस्पतिर्ब्रह्मसूत्रं
मेखलांकश्यपोददात् १४ ददौकृष्णाजिनंभूमिर्दंडंसोमोवनस्पतिः कौ
पीनाच्छादनंमातायौश्छत्रंजगतःपतेः १५ कमंडलुंवेदगर्भःकुशान्सप्त
र्षयोददुः अक्षमालांमहाराजसरस्वत्यव्ययात्मनः १६ तस्मादुपनी
तायंयक्षराट्पात्रिकामदात् भिक्षांभगवतीसाक्षादुमाऽदादंबिकासती
क्षापात्रं १७

सएवंसंभावितोमारिषः श्रेष्ठोबटुर्ब्रह्मवर्चसेनब्रह्मर्षिगणसंजुष्टांतोसभामति
क्रम्यारोचत १८ १९ यदर्थंबटुर्बभूवतदाह श्रुत्वेत्यादियावत्समाप्ति यजमानंय

सब्रह्मवर्चसेनैवंसभांसंभावितोबटुः ब्रह्मर्षिगणसंजुष्टामत्यरोच
तमारिषः १८ समिद्धमाहितंवह्निंकृत्वापरिसमूहनं परिस्तीर्यसम
भ्यर्च्यसमिद्भिरजुहोद्द्विजः १९ श्रुत्वाऽथमेधैर्यजमानमूर्जितबलिं
भृगूणामुपकल्पितैस्ततः जगामतत्राऽखिलसारसंभृतोभारेण
गांसन्नमयन्पदेपदे २०

जंतंभृगूणांभृगुभिः उपकल्पितैः प्रवर्तितैः अखिलेनसारेणबलेनसंभृतः संपूर्णः २०

नर्मदायाउत्तरेतटेभृगुकछसंज्ञकेक्षेत्रेक्रतूत्तमंप्रवर्त्तयंतोयेबलेः ऋत्विजोभृगवः
तेतंव्यचक्षतअपश्यन् आरात्समीपएवोदितंरविमिव २१ तऋत्वि [illegible]

तंनर्मदायास्तटउत्तरेबलेर्यऋत्विजस्तेभृगुकछसंज्ञे प्रवर्त्तयंतोभृगवः क्रतूत्तमं
व्यचक्षताराउदितंयथारविं २१ तऋत्विजोयजमानःसदस्याहतत्विषोवामनतेज
सान्रुप सूर्यःकिलायात्युतवाविभावसुः सनत्कुमारोथदिदृक्षयाक्रतोः २२ इत्थं
सशिष्येषुभृगुष्वनेकधावितर्क्यमाणोभगवान्सवामनः सदंडछत्रंसजलंकमंड
लुंविवेशाबिभ्रद्धयमेधवाटं २३

×विवेश २३

गादयः सूर्यःकिलेत्येवमादिवितर्कयन्तितिशेषः २२ हयमेधवाटंअश्वमेधमंडपं

उपवीताजिनंउपवीतवद्धृतमजिनमेवउत्तरमुत्तरीयंयस्य २४ संक्षिप्ताः अभिभू

मौंज्यामेखलयावीतमुपवीताजिनोत्तरं जटिलंवामनंविप्रंमायामाण

वकंहरिं २४ प्रविष्टंवीक्ष्यभृगवःसशिष्यास्तेसहाग्निभिः प्रत्यगृण्ह

न्समुत्थायसंक्षिप्तास्तस्यतेजसा २५ यजमानः प्रमुदितोदर्शनीयं

मनोरमं रूपानुरूपावयवंतस्माआसनमाहरत् २६ स्वागतेनाभिनं

द्यपादौभगवतोबलिः अवनिज्यार्चयामासमुक्तसंगमनोरमं

ताः संतः २५ रूपस्यानुरूपाअवयवायस्यतंहृद्ध्वेतिशेषः २६ २७ २७

चंद्रमौलिश्चेत्यन्वयः अप्यर्थे चकारः चंद्रमौलिरपि गंगारूपं यन्मूर्ध्ना दधारेत्यर्थः

तस्माद्दशोच्चं कुलकल्मषापहं सधर्मवि[illegible]न्मूर्ध्ना दधात् सुमंगलं य
देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परया च भक्त्या २८ श्रीबलि
रुवाच स्वागतं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते ब्रह्म[illegible]र्षीणां तपः
साक्षान्मन्ये त्वार्य वपुर्धरं २९ अद्य नः पितरस्तृप्ता अद्य नः पावितं
कुलं अद्य स्विष्टः क्रतुरयं यद्भवानागतो गृहान् ३०

२८ हे आर्य त्वां साक्षात्प्रत्यक्षं ब्रह्मर्षीणां तप एव मन्ये कथं भूतं तत्तपः वपुर्देहं संनि
धारि २९

त्वच्चरणावनेजनैर्वार्भिर्हतमंहोयस्यतस्यमे पुनीताप्रवित्रीकृता ३१ मेमत्तः प्र
तीछग्रहाणहे अर्हत्तमपूज्यत्तम ३२ इतिश्री० टीकायां अ० अष्टादशः॥१८ धुनवि

अथाऽन्वयोमेसुहुतायथाविधिद्विजात्मजत्वच्चरणावनेजनैः हतांहसोवार्भिरियं
चभूरहोतथापुनीतातनुभिः पदैस्तव ३१ अयद्यदोवांछसितत्प्रतीछमेत्वामर्थिनं
विप्रसुता नुतर्कये गांकांचनंगुणवद्धाममृष्टंतथान्नपेयमुतवाविप्रकन्यां॥
ग्रामान्समृद्धांस्तुरगान्गजान्वारथांस्तथाऽर्हत्तमसंप्रतीछ ३२ इतिश्रीभा०
अ० बलिवामनसंवादेअष्टादशः १८ ७ श्रीशुकउ० इतिवैरोचनेर्वाक्यंधर्मयु
क्तंससूनृतं निशाम्यभगवान्प्रीतः प्रतिनंद्येदमब्रवीत् १ शैतुहरिणायाचितेन
पदत्रयं प्रतिश्रुतेचबलिनानाजनद्गुरुवारयत् १

ती

दातुः स्तुतिः स्वयं तुष्टिरित्यादि प्रस्तुतोचितं वक्तव्यमिति मिश्रं स्तुशिक्षयन्नाहवा
मनः १ वचस्तवै तदिति षोडशाभिः हे जनदेव सांपराये पारलौकिके च धर्मेपि

श्रीभगवानु॰ वचस्तवैतज्जनदेवसूनृतं कुलोचितं धर्मयुतं यशस्करं यस्य प्रमाणं
भगवः सांपराये पितामहः कुलवृद्धः प्रशांतः २ नह्येतस्मिन् कुले कश्चि[illegible]न्निःस
त्वः कृपणः पुमान् प्रत्याख्याता प्रतिश्रुत्य यो वा दाता द्विजातये ३ न संति तीर्थे यु
धि वार्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः युष्मत्कुले यद्यशसामले
न प्रह्लाद उडुराति यथोडुपः खे ४

तामहश्च प्रह्लादः प्रमाणं २ निःसत्वस्य लक्षणं प्रथ
मं प्रतिश्रुत्य यो वा न ददाति ३ तीर्थे दानावसरे यत्त्वयास्मिन् युष्मत्कुले ४ ५ योद्धि

यतः यस्मिन्कुलेजातः ५ क्ष्मोद्धारेमह्याउद्धरणे ६ ७ ८ पराग्दृशः बहिर्दृष्टेः
अतोऽहृदयेस्थितंमांनद्रक्ष्यतीत्येवंविनिश्चित्यश्वासानिलेंतर्हितः सूक्ष्मोदेहोय

यतोजातोहिरण्याक्ष श्चरन्नेकउर्व्यांमही प्रतिवीरंदिग्विजयेनाविंदतगदायुधः ५
यंविनिर्जित्यकृच्छ्रेणविष्णुः क्ष्मोद्धारआगतं नात्मानंजयिनंमेनेतद्वीर्यंभूर्यनुस्मरन्
६ निशम्यतद्वधंभ्राताहिरण्यकशिपुःपुरा हंतुंभ्रातृहणंक्रुद्धोजगामनिलयंहरेः
७ तमायांतंसमालोक्यशूलपाणिंकृतांतवत् चिंतयामासकालज्ञोविष्णुर्मायाविनां
वरः ८ यतोयतोऽहंतत्रासौमृत्युःप्राणभृतामिव अतोऽहमस्यहृदयंप्रवेक्ष्यामिप
राग्दृशः ९ एवंसनिश्चित्यरिपोः शरीरमाधावतोनिर्विविशेसुरेंद्रः श्वासानिलांत
र्हितसूक्ष्मदेहस्तत्प्राणरंध्रेणविविग्नचेताः १० स विविग्नमतिकंपितंचेतोयस्यअ

नृकंपितविविग्नमतिमात्रां: १०

नददर्शांतः प्रविष्टत्वात् ॥ पुमान्यतः सकाशान्नावर्ततेत द्वैवन्तःगतः निस्य
मुक्तत्वादितिवास्तवोर्थः एवं मन्युपर्यंतमखंडं विष्णोर्वैरं यत्न तवानं तउचितमेव

सतन्निकेतं परिमृग्य शून्यमपश्यमानः कुपितोननाद
क्ष्मां द्यां दिशः खं विवरान्समुद्रान् विष्णुं विचिन्व
न्नददर्शवीरः ॥ अपश्यन्निति होवाच मयान्विष्ट
मिदं जगत् भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान्
१२

तस्याप्रतिद्वंद्वमहाबलपराक्रमस्य श्रूरोहंमानविजृंभितक्रोधानुबंधस्य १२ ५

कथंनामासौसुरशिरोमणिर्जीवन्नेवकातरवद्वैरमुपेक्षितवानित्याशंक्याह वैरा
नुबंधएतावानाम्रत्योर्भवतिहिदेहिनांदेहे निरूढाभिमानवतांश्रूराणांतथाअह
मानेनोपबृंहितोमन्युश्चभवत्येव यतोअज्ञानप्रभवः अज्ञाननिवृत्तेः प्राकृपौरु

वैरानुबंधएतावानामृत्योरिहदेहिनां अज्ञानप्रभवोमन्युरहंमानो
पबृंहितः १३ पिताप्रह्रादपुत्रस्तेतद्विद्वान्द्विजवत्सलः स्वमायुर्द्वि
जलिंगेभ्योदेवेभ्योःदात्सयाचितः १४

षत्यागोमांयमेवेत्यर्थः १३
तदेवंपूर्वजानस्तुत्वातात्पितरंस्तौतिपितेति द्विजवेषधारिणोमहेन्द्रादेर्देवाएतेन
तुद्विजाइतितद्विद्वानपिसयाचितः सन्स्वीयमायुर्देवेभ्योददौ १४ श्रीरामश्रीकृष्ण

भा·अ·
११२

१५ ममपदासंमितानोति त्रिविक्रम पदाभिप्रायेणनचाल्पत्ववादः तत्रापिस्व

भवानाचरितान् धर्मोनास्थितोगृहमेधिभिः ब्राह्मणैः पूर्वजैः
शूरै रन्यैश्चोद्दामकीर्तिभिः १५ तस्मात्त्वत्तोमहीमीषद्वृणेहंव
रदर्षभात् पदानित्रीणिदैत्येंद्रसंमितानिपदाममः १६ नान्य
त्तेकामयेराजन् वदान्याज्जगदीश्वरात् नैनः प्राप्नोतिवैविद्वान्
यावदर्थप्रतिग्रहः १७

पदत्वानपगमात् १६ यावदर्थमेवप्रतिग्रहोयस्यसः १७ श्रीरामचंद्रायनमः

ईश्वरस्यापि [illegible]भ्याकारणंयाभ्यांप्रकारांचोक्काबलेर्बंधनप्रश्नस्योत्तरत्वेनतस्य
गर्वातिरेकेणाधिक्षेपप्रकारमाह अहोइतित्रिभिः तेवाचोवृद्धानांसंमताः त्वंतुबा
लः बालिशमतिश्च बालिशानामज्ञानामिवमतिर्यस्य अतएवस्वार्थप्रतियथावद

बालिरुवाच अहोबाल्मणद्दायादवाचस्तेवृद्धसंमताः त्वंबा
लोबालिशमतिः स्वार्थंप्रत्यबुधोयथा १८

बुधः वस्तुतस्तुबालइवकृष्णबालिशमतिश्चेतिछेदः स्वार्थंप्रत्यबुधइतिभक्तानामे
वार्थंबुध्यसेनस्वार्थंपरिपूर्णस्यतवतद्व्यतिरेकेणस्वार्थाभावादित्यर्थः १८ श्रीकृष्ण

भा॰अ॰
११२

अबुधत्वमेवाह मामिति द्वीपस्य दाशुषं दातारं अबुद्धिमान् वस्तुतस्तु बुद्धिमानित्ये
व छेदः १९ कामं यथेच्छं सम्यक् पादप्रसारणेनेत्यर्थः अतएव तथा करिष्यति २० पु

मां वचोभिः समाराध्य लोकानामेकमीश्वरं पदत्रयं योवृणीते बुद्धिमान् द्वीपदाशुषं
१९ नपुमान् मामनुव्रज्य भूयोयाचितुमर्हति तस्माद्वृत्तिकरीं भूमिं बटोकामं प्रतीछ
मे २० श्रीभगवानुवाच यावंतोविषयाः प्रेष्ठास्त्रिलोक्यामजितेंद्रियं नशक्नुवंति तेसर्वे
परिपूरयितुं नृप २१ त्रिभिः क्रमैरसंतुष्टोद्वीपेनापिनपूर्यते नववर्षसमेतेनसप्तद्वी
पवरेच्छया २२

नरपि निस्पृहत्वमेवाविष्कुर्वन्नाह यावंत इति सप्तभिः २१ नववर्षस
मेतेन द्वीपेनापि सप्तानां द्वीपवराणां इच्छया २२

११२

तृष्णायाअंतंनगताइत्यस्माभिःश्रुतं २३ असंतुष्टस्तुप्राप्तैस्त्रिभिर्लोकैरपिनसु
खंवर्त्तते २४ २५ आशुशुक्षणिरग्निः २६ सिद्धोःहंकृतार्थः एतावतैवसर्वस्याप

सप्तद्वीपाधिपतयोनृपावैन्यगयादयः अर्थैः कामैर्गतानांतंतृष्णायाइतिनःश्रुतं २३
यदृच्छयोपपन्नेनसंतुष्टोवर्त्ततेसुखं नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः २४
पुंसोयंसंसृतेर्हेतुरसंतोषोःर्थकामयोः यदृच्छयोपपन्नेनसंतोषोमुक्तयेस्मृतः २५
यदृच्छालाभतुष्टस्यतेजोविप्रस्यवर्द्धते तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्ष
णिः २६ तस्मात्त्रीणिपदान्येववृणेहंवरदर्षभात् एतावतैवसिद्धोहंवित्तंयावत्प्रयो
जनं २७

हारसिद्धेरितिगूढोभिप्रायस्तदेवा ह वित्तंहियावत्प्रयोजनमेवसुखं अधि
कस्यक्लेशावहत्वादित्यर्थः २७

२८ २९ ३० अनयः अन्यायः ३१ अन्यायमेवाह एषइति ३२ ननुमयापदत्रयमेव

शुकउ॰ इत्युक्तःसहसन्नाहवांछातः प्रतिगृह्यतां वामनायमहींदातुंजग्राहजलभा
जनं २८ विष्णवेस्मांप्रदास्यंतमुशनाअसुरेश्वरं जानन्चिकीर्षितंविष्णोः शिष्यंप्रा
हविदांवरः २९ शुकउ॰ एषवैरोचनेसाक्षाद्भगवान्विष्णुरव्ययः कश्यपाददितेर्जा
तोदेवानांकार्यसाधकः ३० प्रतिश्रुतंत्वयैतस्मैयदनर्थमजानता नसाधुमन्येदैत्या
नांमहदुपगतोऽनयः ३१ एषतेस्थानमैश्वर्यंश्रियंतेजोयशःश्रुतं दास्यत्याच्छिद्यशा
क्रायमायामाणवकोहरिः ३२ त्रिभिः क्रमैरिमाल्लोकान्विश्वकायः क्रमिष्यति सर्व
स्वंविष्णवेदत्वामूढवर्तिष्यसेकथं ३३

प्रतिश्रुतंनाधिकंतत्राह त्रिभिरिति क्रमतामि
तिचेत्तत्राह सर्वस्वमिति ३३

तथापिप्रतिश्रुतंसंपादनीयमेवेतिचेत् तत्राह क्रमत इतिद्वाभ्यां एकेनपादन्यासे नभूमिंक्रममाणस्येत्यर्थः तार्तीयस्यतृतीयपदन्यासस्य ३४ ३५ तथाऽपिसर्वस्व

॥ क्रमतोगांपदैकेनद्वितीयेनदिवंविभोः खंचकायेनमहतातार्तीयस्यकुतोगतिः ३४ निष्ठांतेनरकेमन्येत्वप्रदातुःप्रतिश्रुतं प्रतिश्रुतस्यपापीयः नीशाःप्रतिपादयितुंभवान् ३५ नतद्दानंप्रशंसंतियेनवृत्तिर्विपद्यते दानंयज्ञस्तपःकर्मलोकेवृत्तिमतोयतः ३६

दानात्कीर्तिस्तावद्भविष्यतिचेत्तत्राह नतद्दानमिति तपःचित्तैकाग्र्यं कर्मपूर्तं ३६

ननुतर्हिप्रतिश्रुतस्यनेतिकथमनृतंवाच्यंतत्राह धर्मायेतिसार्धैःषड्भिः ३७ अत्रापि
सत्यानृतव्यवस्थायांबह्वृचश्रुतिमाह प्रथमं ॐमितिसत्यंनेत्यनृतमित्यादिसत्या
नृतयोर्लक्षणपूर्वकंस्तुतिनिंदाभ्यांसत्यंविहितंअनृतंचनिषिद्धंअनंतरंचपरा

धर्माययशसेऽर्थायकामायस्वजनायच पंचधाविभजन्वित्तमिहामुत्रचमोदते
३७ अत्रापिबह्वृचैर्गीतंशृणुमेसुरसत्तम सत्यमोमितियत्प्रोक्तंयन्नेत्याहानृतं
हितं ३८

तद्

ग्वाएतदृक्तमक्षरमित्यादिनासत्येदोषाननृतेचगुणानुक्कातस्मात्काल
एवदद्यात्कालेनदद्यान्ननुसत्यानृतेमिथुनीकरोतीत्युपसंहारेणवृत्तिसंकटादि
ष्वनृतमप्यनुज्ञातंतमिमंश्रुत्यर्थंदर्शयन्नाह ओमित्यंगीकारेणयत्प्रोक्तंतत्सत्यं
नेतियदाहतदेवानृतं ३९

तत्तुसत्यमीषदनृतंविनानसिध्यतीत्याशयेनाह सत्यंपुष्पफलंविद्यात्जानीया
त् आत्मवृक्षस्यदेहरूपस्यवृक्षस्य कुतः गोपनेश्रुत्योच्यतइत्यर्थः पाठांतरेतु
सुगमं यद्यपिश्रुत्यावाचः सत्यंपुष्पंफलंचेत्युक्तं तथापिवाचोदेह निर्वाहाधीन

सत्यंपुष्पफलंविद्यादात्मवृक्षस्यजीवतः वृक्षेजीवतितन्नस्यादनृतंमूलमात्मनः
२९ तद्यथावृक्षउन्मूलः शुष्यत्सुद्वर्त्तते चिरात् एवंनष्टानृतः सद्यआत्माशुष्येन्न

संशयः ४०

त्वाद्दात्मवृक्षस्येतिप्रस्तुतानुसा रेणोक्तं भवतुपुष्पफलस्थानीयंसत्यं
ततः किमतआह वृक्षेदेहेअजीवतितत्पुष्पफलंनस्यात् सानस्यादितिपाठेश्रुत्यु
कायावाचः परामर्शः देहस्यानृतेनरक्षणीयत्वस्याह अनृतंत्वात्मनोदेहस्यमूलं ३१

भा.अ.
११६

एतद्वेवद्दृष्टांतेनस्पष्टयति तद्यथावृक्षउत्पाटितमूलः शुष्यति अचिराद्देवोद्धर्तते
प तातिच एवंनष्टमनन्तंयस्यसआत्मादेहः शुष्येत् यद्य पिचश्रुत्साएवमेवानृ
तंवदन्नात्मानमाविर्मूलंकरोतीत्येवंनिंदयानृतंनिषिद्धंतयाऽप्युपसंहारानुसारे
णतत्केवलानृतविषयमित्यभिप्रेत्यैवव्याख्यातं दयेनत्वेनेनें तथैवोक्तेः त
थाचश्रुतिः ॐ मितिसत्संनेत्यनृतंतदेतत्पुष्पंफलंवाचोयत्सत्सं सहेश्वरोयश
स्वीकल्याण कीर्तिर्भविता पुष्पंहिफलंवाचः सत्संवदत्यथैतन्मूलंवाचोयदनृ
तंतयथावृक्षआविर्मूलः शुष्यतिसउद्वर्तत एवमेवानृतंवदन्नाविर्मूलमात्मा
नंकरोतिसशुष्यतिसउद्वर्ततेतस्मादनृतंनवदेद्दयेनत्वेनेनेति एनेनअनेनतु
अनृतेनदयेनसंकटेप्यात्मानंरक्षेदितिश्रुत्यर्थः ४० नमोभगवतेश्रीलक्ष्मीकां

सुप संहारेण

११६

सर्वथासत्यवचनेनदेहोननिर्वहेदितिस्फुटीकर्तुंसत्यदोस्येषानन्ततस्यगुणानाह परा
गितिद्वाभ्यां यदोमित्यक्षरंतत्पराक् दूरेअर्थंगृहीत्वांचतीतिपराक् रिक्तमितिश्रुति

पराग्रिक्तमपूर्णंवाअक्षरंयत्तदोमिति तच्च
त्किंचोमितिब्रूयात्तेनरिच्येतवैपुमान् ४१

पदस्यव्याख्यानं अपूर्णंवैइति तत्तस्मात् अर्थिनेयात्किंचिदोमितिदास्यामीतिब्रू
यात् तेनरिच्येतन्यूनोभवेत् ४१

किंच भिक्षवेसर्वमों कुर्वन् दास्यामीत्यंगीकुर्वन् आत्मनेकामेननालं पर्याप्ते नभवतितस्ययोगोनसिध्यतीत्यर्थः तथाचश्रुतिः पराग्वाएतद्रिक्तमक्षरंयद्देत दोमितितयात्किंचोमित्याहात्रैवास्मैतद्रिच्यतेसयत्सर्वमोंकुर्याद्रिच्यादात्मानंस

भिक्षवेसर्वमोंकुर्वन्नालंकामेनवात्मने अथै
तत्पूर्णमभ्यात्मंयज्ञनेत्यऽनृतंवचः ४९

कामेभ्योनलंस्यादितिनेतियदनृतंवचः एतत्पूर्णेअर्थव्ययाभावात् अभ्यात्मंचे तिचकारा[illegible]न्वयः आत्मनोऽभिमुख मन्यस्यार्थमाकर्षतीत्यभ्यात्मंयोहिनित्यंममकिमपिनास्तिसीदामीतिब्रूतेसहितेनानृतेनपरेषामर्थानाकर्षतीतिप्रसिद्धं ४९

ननु तर्हि इदमनृतमनृतत्वस्य सर्वदा सेव्यं स्यात् नेत्याह सर्वमिति तथा च श्रुतिः अथैते
तत्पूर्वमात्मानं यन्नेति स यत्सर्वं नेति ब्रूयात् पापिका अस्य कीर्तिर्जायेत सैनं तत्रैव ह
न्यादिति अतो रतिसंकटादिष्वनृतेन दोषायेत्युपसंहरति स्त्रीष्विति नो साह नेन वशीका

सर्वं नेत्यनृतं ब्रूयात् स उ अकीर्तिः अघसम्मतः स्त्रीषु नर्म विवाहे च वृत्त्यर्थे प्राणसंकटे
गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितं ४३ इति श्रीभा॰ अ॰ वामनपञ्चभो
वेएकोनविंशोध्यायः १९

रे विवाहे च वरादिस्तुतौ गवां ब्राह्मणानां च हितार्थे हिं
सायां च कस्य चित्त्राणाय तथा च याज्ञवल्क्यः वर्णिनां हि वधो यत्र तत्र साक्ष्यनृतं व
देदिति तथा च श्रुतिः तस्मात्काल एव दद्यात्काले न दद्यात्तत्सत्यानृते मिथुनीकरोती
ति ४३ इत्यष्टमे एकोनविंशः १९

विंशेत्वन्नभीतोऽसौज्ञात्वापिकपटंहरेः ददावेवततोविष्णुः सहसाऽवर्द्धताऽद्भुतं १
भगवतात्वयाप्रोक्तंसत्यं किंतत् योर्थकामादिकंनबाधेतसगृहमेधिनांधर्मइति

श्रीशुकउवाच बलिरेवंगृहपतिः कुलाचार्येणभाषितः तूष्णीं
भूत्वाक्षणंराजन्नुवाचाऽवहितोगुरुं १ बलिरुवाच सत्यंभग
वताप्रोक्तंधर्मोयंगृहमेधिनां अर्थंकामंयशोवृत्तिंयोनबाधेत
कर्हिचित् २ सचाहंवित्तलोभेनप्रत्याचक्षेकथंद्विजं प्रतिश्रुत्य
ददामीतिप्राह्लादिःकितवोयथा ३

२ कथंप्रत्याचक्षेनिराकरोमि ३

ननु प्रत्याख्यानेदोषाउक्ताः तत्राह नाहमिति अधन्यात् दारिद्र्यात् मृत्योरपि ५
किंच यद्यद्धनादिकंनत्सर्वंसंपरेतंमृतंपुरुषंहास्यतित्यक्ष्यत्येव तत्किमितिजीवतैव
स्वयंनदेयमितिभावः तथापिनावद्धृत्तिसंकटपरिहारार्थंअर्थंदीयतांइतिचेत्

नत्यसत्यात्परोऽधर्मइतिहोवाचभूरियं सर्वंवोढुमलंमन्येऋतेऽलीकपरंनरं ४
नाहंबिभेमिनिरयान्नाऽधन्यादसुखार्णवात् नस्थानच्यवनान्मृत्योर्यथाविप्रप्रलंभ
नात् ५ यद्यद्धास्यतिलोकेऽस्मिन्संपरेतंधनादिकं तस्यत्यागेनिमित्तंकिंविप्रस्तु
ष्येन्नतेनचेत् ६ तत्राह तस्येतिविप्रश्चेत्तेनार्थेनदत्तेनापिनतुष्येत्तर्हितस्या
र्थस्यत्यागेदानेकिंनिमित्तं नकिंचित् याचितादल्पस्यदानेविप्रस्यासंतोषेणदानंव्य

र्थमेवस्यात् अतस्तयावितंसर्वंदेयंनचकिंचिदितिभावः ६ तर्हिनदेयमेवेतिचेत्त
त्राह श्रेयइति दुरत्ययैरसुभिरपि कोविकल्पोविचारः ७ येदैत्येंद्रैर्युद्धेऽनिवर्त्ति

श्रेयः कुर्वंतिभूतानांसाधवोदुस्त्यजासुभिः दध्यङ्शिबिप्र
भृतयः कोविकल्पोधरादिषु ७ यैरियंबुभुजेब्रह्मन्दैत्येंद्रै
रनिवर्त्तिभिः तेषांकालोऽग्रसील्लोकान्नयशोधिगतंभुवि ८

भिरियंभूर्बुभुजेउपभुक्ता तेषामिहलोकान्परलोकांश्चभोगानितिवाकालोऽ
ग्रसीत् संहृतवान् नतुभुविनैरधिगतंप्राप्तंयशोऽग्रसीत् अतःकीर्त्तिरेवसाध्या
नान्यदितिभावः ८

देहत्यागादपिधनत्यागेकीर्त्तिर्भवतीत्याह सुलभाइति तनुंत्यजंतीतित्तथा तीर्थेपात्रे
अतोदुष्करोधनत्यागएवमयाकार्यइतिभावः १ तर्हिनिर्धनत्वेनदैन्यंस्यादितिचेत् न

सुलभायुधिविप्रर्षेत्यनिरस्तास्तनुत्यजः नतथातीर्थआयातेश्रद्धयायेधनत्यजः १ मनस्विनःकारुणिकस्यशोभनंयदर्थिकामोपनयेनदुर्गतिः कुतःपुनर्ब्रह्मविदांभवादृशां ततोवधोरस्यददामिवांछितं १०

त्याह मनस्विनइति यादृशातादृशानामप्यर्थिनांकामोपनयेनकाम पूरणेन दुर्गतिर्दैन्यमितियत्तच्छोभनंभद्रमेवभवादृशानांतुकामोपनयेनदुर्गतिःशोभनमितिकिंपुनर्वक्तव्यमित्यर्थः १०

ननुनायंबद्धः किंतुविष्णुस्तवशत्रुरित्युक्ते तर्हिसुतरामेवदास्यामीत्याह यजंतीति
परःशत्रुर्वास्तु ११ १२ यद्यदियशोनजिहास्यतितर्हियुद्धेमांहत्वाएनांभूमिंहरेत् श

यजंतियत्क्रतुभिर्यमादृताभवंतआम्नायविधानकोविदाः सएष
विष्णुर्वरदस्तुवापरोदास्याम्यमुष्मैक्षितिमीप्सितांमुने ११ यद्यप्य
साऽवधर्मेणमांबध्नीयादनागसं तथाप्येनंनहिंसिष्येभीतंब्रह्म
तनुंरिपुं १२ एषवाउत्तमश्लोकोनजिहास्यतियद्यशः हत्वामैनां
हरेद्युद्धेशयीतनिहतोमया १३

यीतवा सम्यक्ज्ञातःसन्ममचित्तेशयीतेतिवास्तवोऽर्थः १३ नमोनारायणाय

अभ्यर्थितं अजातश्मश्रुं १५ १५ १६ जालकं मुक्ताभरणविशेषः तन्मालावती

श्रीशुक उ० एवमभ्यर्थितोशिष्यमनादेशकरंगुरुः शशापदैव प्रहितःसत्यसंधंमनस्विनं १४ दृढंपंडितमान्यज्ञःस्तब्धोऽस्म
समुपेक्षया मच्छासनातिगोयस्त्वमचिराद्भ्रश्यसेश्रियः १५ ए
वंशप्तःस्वगुरुणासत्यान्नचलितोमहान् वामनायददावेतामर्चि
त्वोदकपूर्वकं १६ विंध्यावलिस्तदागत्यपत्नीजालकमालि
नी आनिन्येकलशंहैममवनेजन्यपांभृतं १७
अवनेजनीनामपांकलशं १८

२

१८ १९ २० अवर्द्धत वांछातः प्रतिगृह्यतामितिबलिनापूर्वमुक्तत्वात् गु
णत्रयमात्मनियस्यतत् अतएवभूः खमित्यादयोययस्मिन् आसतस्थितवंतः २१

यजमानःस्वयंतस्यश्रीमत्पादयुगंमुदा अवनिज्यावहन्मूर्द्धितदपोविश्वपावनीः १८
तदासुरेंद्रंदिविदेवतागणागंधर्वविद्याधरसिद्धचारणाः तत्कर्मसर्वेपिगृणंतआ
र्जवंप्रसूनवर्षैर्ववृषुर्मुदान्विताः १९ नेदुर्मुहुर्दुंदुभयःसहस्रशोगंधर्वकिंपूरुषकिं
नराजगुः मनस्विना तेनकृतंसुदुष्करंविद्वानदायद्रिपवेजगत्त्रयं २० तद्वामनंरूप
मवर्धताद्भुतंहरेरनंतस्यगुणत्रयात्मकं भूःखंदिशोद्यौर्विवराःपयोधयस्तिर्यङ्नृ
देवाऋषयोयदासत २१ कायेबलिस्तस्यमहाविभूतेःसहर्त्विगाचार्यसदस्यएतत्
ददर्शविश्वंत्रिगुणंगुणात्मकेभूतेंद्रियार्थाशयजीवयुक्तं २२

तदेवप्रपंचयति रसामितिपादोनैः सप्तभिः मारुतंगणंवायुसंघं इंद्रस्यसेनेव
सेनायस्यसः इंद्रपदेस्थितत्वात् अचष्ट ऐक्षत २३ आत्मास्यंबलिमुख्यो

रसामचष्टांघ्रितलेथपादयोर्महीमहीध्रान्पुरुषस्यजंघयोः पतत्रिणोजानुनि
विश्वमूर्तेरूर्वोर्गणंमारुतमिंद्रसेनः २३ संध्यांविभोर्वाससिगुह्यऐक्षत्प्रजा
पतीन्जघनेआत्ममुख्यान् नाभ्यांनभःकुक्षिषुसप्तसिंधूनुरुक्रमस्योरसिच
र्क्षमालां २४ हृद्यंगधर्मंस्तनयोर्मुरारेर्ऋतंचसत्यंचमनस्यथेंदुं श्रियंचवक्षस्य
रविंदहस्तांकंठेचसामानिसमस्तरेफान् २५

येषांतान् ऋक्षमालांनक्षत्रपंक्तिं २४ अंगहेराजन् समस्तान्रेफान्स्वरशब्दान्

भा॰अ॰

१२१

४ वदनेचवन्हिंद्योःस्वर्गंमूर्ध्नि केशेषुमेघान्स्वसनंनासिकायांअक्ष्णोश्चसूर्यंवाण्यांछंदांसिरसेजलेशंभ्रुवोर्निषि

द्यौश्चयांच २६ रसेरसने २७ रेतसोरेतसिक्रमणेषुपादन्यासेषु ओषधिजातयः

इंद्रप्रधानानमरान्भुजेषुतत्कर्णयोःककुभोद्यौश्चमूर्ध्नि केशेषुमेघान्स्वसनंना
सिकायामक्ष्णोश्चसूर्यंवदनेचवन्हिं २६ वाण्यांचछंदांसिरसेजलेशंभ्रुवोर्निषिधं
चविधिंचपक्ष्मसु अहश्चरात्रिंचपरस्यपुंसोमन्युंललाटेधरएवलोभं २७ स्पर्शे
चकामंन्रपरेतसोंभःपृष्ठेत्वधर्मंक्रमणेषुयज्ञं छायासुमृत्युंहसितेचमायांतनूरु
हेष्वोषधिजातयश्च २८ नदीश्चनाडीषु शिलानखेषुबुद्धावजंदेवगणानृषींश्च
प्राणेषुगात्रेस्थिरजंगमानिसर्वाणिभूतानिददर्शवीरः २९

ओषधिजातीश्च २८ प्राणेषुइंद्रियेषु २९ श्रीरामचंद्रायनमोनमः श्रीरामश्री

पंक्तिसंख्या १९८ (?)

१२१

सर्वात्मनीत्यादिवाक्यांतरं सुदर्शनमित्यादीनामीशमुपतस्थुरित्युत्तरेणान्वयः

सर्वात्मनीदंभुवनंनिरीक्ष्यसर्वेऽसुराः कश्मलमापुरंग सुदर्शनंचक्रमसह्यतेजो धनुश्चशार्ङ्गंस्तनयित्नुघोषं ३० पर्जन्यघोषोजलजः पांचजन्यः कौमोदकीविष्णुगदातरस्विनी विद्याधरोऽसिः शतचंद्रयुक्तस्तूणोत्तमावक्षयसायकौच ३१ सुनंदमुख्याउपतस्थुरीशंपार्षदमुख्याः सहलोकपालाः स्फुरत्किरीटांगदमीनकुंडलःश्रीवत्सरत्नोत्तममेखलांबरैः ३२ मधुव्रतस्रग्वनमालयावृतोरराज राजन्भगवानुरुक्रमः क्षितिंपदैकेनबलेर्विचक्रमेनभः शरीरेणदिशश्चबाहुभिः

३० विद्याधरसंज्ञोसिः ३१ मीनकुंडलेमकरकुंडले स्फुरंतिकिरीटादीनियस्यसः ३२

कुंडल

मधुव्रतानांस्त्रजोयस्यांतयावनमालंश्रीवत्सादिभिश्चावृतोव्यासः उरुक्रमत्वमे
वाह क्षितिमिति ३३ द्वितीयंपदंक्रमतोविक्षिपतास्त्रिविष्टपंतदीयंकिंचिन्मात्रंज

पदंद्वितीयंक्रमतस्त्रिविष्टपंनवैतृतीयायतदीयमण्वपि उरुक्रमस्यां
घ्रिरुपर्युपर्यथोमहर्जनाभ्यांतपसःपरंगतः ३४ इतिश्रीभागवतेम
हा॰पुराणेअष्टमस्कंधेवामनविश्वरूपोनामविंशतिमोध्यायः २०॥

तं तृतीयायतुनकिंचिदपि तत्रहेतुः उरुक्रमस्यांघ्रिस्त्रिविष्टपाउपर्युपरिगच्छन्महर्
र्जनाभ्यांतपसश्चपरंसत्यलोकंगतइति ३४ इतिश्रीभागवतेम॰टी॰विंशतिः २०

एकविंशोपदापूर्त्तिमिषेणबलिबंधनं विष्णुनाकृतमुत्कर्षंतस्यख्यापयितुंजने १
उरुक्रमस्यांघ्रिस्तपसः परंगतइत्युक्तं ततः किंवृत्तंतदाह सत्यंसत्यलोकंप्राप्तं
तमंघ्रिंसमीक्ष्याब्जभवोऽभ्यगात् तथामरीचिमिश्राऋषयश्चेतिद्वयोरन्व

श्रीशुकउवाच सत्यंसमीक्ष्याब्जभवोनखेंदुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् मरीचिमिश्राऋषयोबृहद्व्रताः सनंदनाद्यानरदेवयोगिनः १

यः कथंभूतोऽब्जभवः हरेरंघ्रेर्नखा एवेंदवः तैर्हतास्वधाम्नोद्युतिर्यस्यसः स्वयंचतैरावृतः छन्नः हेनरदेव बृहद्व्रतायोगिनश्च १ ७

अंगानिशिक्षादीनिपुराणानितत्संहिताश्चयोगएवसमीरस्तेनदीपितंज्ञानमेवा
ग्निस्तेनरंधितंदग्धंकर्मकल्मषंकर्ममलंयेषांतेचसर्वेतमंघ्रिंववंदिरे यस्यांघ्रेः

वेदोपवेदानियमायमान्वितास्तर्केतिहासांगपुराणसंहिताः येचा
परेयोगसमीरदीपितज्ञानाग्निनारंधितकर्मकल्मषाः ववंदिरेय
त्स्मरणानुभावतः स्वायंभुवंधामगताअकर्मकं अथांघ्रयेऽत्रो
मितायविष्णोरुपाहरत्सप्रभवोऽर्हणोदकं सम र्च्यभक्त्याऽभ्य
र्हणाक्षुत्रिविश्ववायन्नाभिपंकेरुहसंभवः स्वयं

भवः तस्यविष्णोरंघ्रिसमभ्य
स्मरणानुभावतः अकर्मकंकर्मभिरप्राप्यं २ विष्णोरंघ्रये स्वयंयस्यनाभिपंकेरुहसं

लोकत्रयं निमार्ष्टि पवित्रयति ४ संक्षिप्तात्मपसंलक्षता आत्मविभूतिः स्वविस्तारो ये

धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेंद्र स्वर्धुन्यभून्नभसि सा पतती निमार्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ४ ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः सानुगा बलिमाजहुः संक्षिप्तात्मविभूतये ५ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः धूपैर्दीपैः सुरभिभिर्लाजाक्षतफलांकुरैः ६ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः नृत्यवादित्रगीतैश्च शंखडुंडुभिनिस्वनैः ७

ननृतस्मै यथापूर्वं वामनरूपेण स्थिताये स्मर्थैः ५ ७

समर्षिता

८ त्रिपदविषयव्याजयाभ्याकपटयाभ्यातयास्वभर्तुर्बलेर्महींहृतांदृष्ट्वोचुः ९

जांबवान्नृक्षराजस्तुभेरीशब्दैर्मनोजवः विजयंदिक्षुसर्वासुमहोत्सवम घोषयत् ८ महींसर्वांहृतांदृष्ट्वात्रिपदव्याजयाच्ञया ऊचुः स्वभर्तुर सुरादीक्षितस्याऽत्यमर्षिताः ९ नवाऽयंब्रह्मबंधुर्विष्णुर्मायाविनां वरः द्विजरूपप्रतिछन्नोदेवकार्यंचिकीर्षति १० अनेनयाचमानेनश त्रुणाबटुरूपिणा सर्वस्वनोहृतंभर्तुर्न्यस्तदंडस्यबर्हिषि ११ सत्यव्र तस्यसततंदीक्षितस्यविशेषतः नाऽनृतंभाषितुंशक्यंब्रह्मण्यस्य दयावतः १२

किमूचुस्तदाह नवेइतिसार्द्धे स्त्रिभिः १० ११ १२ श्रीराम

अनुचरास्वर्तेसुराश्च १३ १४ १५ १६ १७ १८

तस्मादस्यवधेधर्मोभर्तुःशुश्रूषणंचनः इत्यायुधानिजगृहुर्बलेरनुचरा
सुराः १३ तेसर्वेवामनंहंतुंशूलपट्टिशपाणयः अनिच्छतोबलेराजन्
प्राद्रवन्जातमन्यवः १४ तानभिद्रवतोदृष्ट्वादितिजानीकपान्नृप प्रह
स्यानुचराविष्णोःप्रत्यषेधन्नुदायुधाः १५ नंदःसुनंदोथजयोविजयः
प्रबलोबलः कुमुदःकुमुदाक्षश्चविष्वक्सेनःपतत्रिराट् १६ जयंतः
श्रुतदेवश्चपुष्पदंतोथसात्वतः सर्वेनागायुतप्राणाश्चमूंतेजघ्नुरासुरीं
१७ हन्यमानान्स्वकान्दृष्ट्वापुरुषानुचरैर्बलिः वारयामाससंरब्धान्काव्य
शापमनुस्मरन् १८

अर्थत्वत अनुकूलः १८ पौरुषैस्तं कालमतिवर्त्तितुं पुमानीश्वरः समर्थो न भवति

हे विप्रचित्ते हे राहो हे हेने मे श्रूयतां वचः मा युध्यत निवर्त्तध्वं न नः कालोयमर्थकृ
त् १९ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये तं नातिवर्त्तितुं दैत्याः पौरुषैरीश्व
रः पुमान् २० यो नोभवाय प्रागासीदभवाय दिवौकसां स एव भगवानद्य वर्त्त
ते तद्विपर्ययं २१ बलेन सचिवैर्बुध्या दुर्गैर्मंत्रौषधादिभिः सामादिभिरुपायैश्च
कालं नात्येति वै जनः २२ भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः दैवेनर्द्धैस्त एवा
द्य युधि जित्वा नदंति नः २३ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति तस्मात्कालं
प्रतीक्षध्वं यो नोऽर्थत्वाय कल्पते २४ २० हरेरनुचराः देवाः दैवेन ऋद्धैः समृद्धैः भव
द्भिः २३ अर्थत्वाय आनुकूल्याय २४

२५ विषुपार्क्षिषुराजत्तइति विराट् प्रभोश्चिकीर्षितंज्ञात्वा अयमर्थः अस्यसर्वस्वा
पहारेणममेत्याभिमानंसंत्याज्येदानींदेहस्वीकारेणाहंकारमपित्याजयित्वापरमानु
ग्रहंकर्त्तुमिच्छति नचानेनतुल्योऽन्यः कोपिसत्यसंधोधीरोवास्तीतितद्यशः प्र

मूल० पत्युर्निगदितंश्रुत्वादैत्यदानवयूथपाः रुषंनिविविशुराजन्विष्णुपार्षद
ताडिताः २५ अथतार्क्ष्यसुतोज्ञात्वाविराड्प्रभुचिकीर्षितं बबंधवारुणैःपाशैर्ब
लिंसौत्येहनिक्रतौ २६ हाहाकारोमहानासीद्रोदस्योःसर्वतोदिशं ग्रह्यमाणेसुरप
तौविष्णुनाप्रभविष्णुना २७

ख्यापनार्थंकिंचिद्घातयितुमपीच्छतीतिप्रभोःअ
भिप्रायंज्ञात्वातंबबंधेति सौत्येऽहनिसोमाभिषवदिने २६ रोदस्योः द्यावापृथिव्योः

२८ २९ असौसूर्यः ३० मयाआत्मनेत्यन्वयः व्यापिनेत्यर्थः खंचदिशश्च तनोः

तंबद्धंवारुणैःपाशैर्भगवानाहवामनः नष्टश्रियंस्थिरप्रज्ञमुदारयशसंनृप २८
पदानित्रीणिदत्तानिक्रमैर्मत्स्यंत्वयासुर द्वाभ्यांक्रांतामहीसर्वातृतीयमुपकल्प
य २९ यावत्तपत्यसौगोभिर्यावदिंदुःसहोडुभिः यावद्वर्षतिपर्जन्यस्तावतीभू
रियंतव ३० पदैकेनमयाक्रांतोभूर्लोकःखंदिशस्तनोः स्वर्लोकस्तुद्वितीयेनपश्य
तस्तेस्वमात्मना ३१ प्रतिश्रुतमदातुस्तेनिरयेवासइष्यते विशत्वंनिरयंतस्मा
द्गुरुणाचानुमोदितः ३२

तन्वानेत्वदीयंसर्वस्वं ३१ गुरुणाशुक्रेणानुमोदितःसन् ३२

सएवमुक्तेपिनिरयपरिहारार्थंस्वर्गाद्भ्रंशपरिहारार्थंचमनोरथंकुर्वंतंप्रत्याह २
थेति यःप्रतिश्रुतस्यादानेनयाचकंविप्रलंभतेतस्यमनोरथोवृथैव स्वर्गश्च्युत
स्यहृरएवसचाधःपतत्येव ३३ त्वयाचाहंविप्रलब्धःतस्माद्दलीकफलंनिरयंभुं

२ यथामनोरथस्तस्यदूरःस्वर्गःपतत्यधः प्रतिश्रुतस्याददानेनयोर्थिनंविप्रलंभते
३३ विप्रलब्धोददामीतित्वयाहंचाढ्यमानिना तद्व्यलीकफलंभुंक्ष्वनिरयंकति
चित्समाः ३४ इतिश्रीभा॰अ॰ बलिनिग्रहेएकविं शः २१ ७ शुक॰ एवंवि
प्रकृतोराजन्बलिर्भगवतासुरः भिद्यमानोऽप्यभिन्नात्माप्रत्याह विक्लवंवचः

इत्यर्थः ३४ इतिअध्यायः २१ द्वाविंशेतुप्रसन्नःसन्प्रस्थाप्यसुतलेबलिं दत्वा
वरान्हरिर्नृलिंमत्वातत्द्वारपोऽभवत् १

समर्पिततन्न्विलनिर्मलाचलभक्तितः छलितोबलिनाचित्रंस्वमेवार्पयदच्युतः २ विप्रलब्धः अपहृतः भिद्यमानः सत्याच्चाल्यमानः १ हेउत्तमश्लोकेतिकटाक्षः ममवचः ईरितंप्रतिश्रुतंतेनत्वांव्यलीकंत्वयाकपटेनवामनतयाभिक्षित्वारूपांतरस्याविष्कृतत्वात् एवमपियदिभवान्व्यलीकंमन्यतेतथापिकृत

बलिरु॰ यउत्तमश्लोकभवान्ममेरितंवचोव्यलीकंसुरवर्यमन्यते करोम्यृतंतन्नभवेत्प्रलंभनंपदंतृतीयंकुरुशीर्ष्णिमेनिजं २

मेवाहंकरोमिमउक्तंप्रलंभनंनभवतुमेशीर्ष्णिनिजंतृतीयंपदंकुरुनचद्वाभ्यांविश्वंक्रांतवतोमेतवशिरः पदपर्याप्तंनभवतीतिमन्येथाः वित्तेनचेत्पदद्वयंजातंतर्हिइदमधिकमेवस्याद्वित्तादपिवित्तवतोधिकत्वादितिभावः २

ननुच आपदर्थे धनं रक्षेद्दारान् रक्षेत् धनैरपि आत्मानं सततं रक्षेद्दारैरपि धनैर
पीसादि वचनादात्म भयपरिहाराय सर्वस्वं त्यज्यते त्वं तु कुतो भीतः सन्नात्मा
नमर्पयसि अत आह बिभेमीति असाधुवादात् अपकीर्तेर्यथाहं त्रस्तशमुद्वि

बिभेमि नाहं निरयात्स्वदच्युतो न पाशबंधाश्च [illegible] सनाद्वुरत्ययात्
नैवार्थकृच्छाद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ३ पुंसां श्लाघ्यत
मं मन्ये दंडमर्हत्तमार्पितं यं न माता पिता भ्राता सुहृदश्चादिशंति हि ४ जेतथा
निरयादिभ्यो न बिभेमि ३ ननु मया निग्रहात्तवापकीर्तिर्जातैव नैवेत्याह पुंसामि
ति अर्हत्तमैरर्पितं यं दंडं मात्रादयोपि न आदिशंति नैवार्पयंति हितैषिणा त्वया
निगृहीतोऽहं श्लाघ्य एवास्मीति भावः ४

नन्वहंदेवानांहितैषीनासुराणांतत्राह त्वंनूनमिति परोक्षःशत्रुछलेनवर्त्तमा
नः ५ शत्रुत्वंपुनर्भक्तानिवास्माननुग्रहीतुमेवेत्याह यस्मिन्निति अहो ह्य

त्वंनूनमसुराणांनःपरोक्षःपरमोगुरुः योनोऽनेकमदांधानांविभ्रं
शंचक्षुरादिशत् ५ यस्मिन्वैरानुबंधेन रूढेन विबुधेतराः बहवो
लेभिरेसिद्धियामुहैकांतयोगिनः ६ तेनाहंनिग्रहीतो
स्मिभवताभूरिकर्मणा बद्धश्चवारुणैःपाशैर्नातिव्रीडेनचव्यथे ७

सिद्धं ६ अतोनात्रममलज्जानापिदुःखमित्याह तेनगुरुणाभवता ७ ७

किंच योऽयं दंडरूपो ममानुग्रहः त्वयाकृतः सतु त्वऊकपौत्रत्वेन न त्वहमनुग्रहस्य पा
त्रमित्याशयेनाह पितामह इति भवदीयानां संमतः यतः आविष्कृतः साधुवा

पितामहो मे भवदीयसंमतः प्रह्लाद आविष्कृतसाधुवादः
भवद्विपक्षेण विचित्रवैशससंसंप्रापितस्त्वत्परमः स्वपित्रा ८

दो यस्य त्वमेव परमः आश्रयो यस्य सः अतः भवतो विपक्षेण विद्विषा हिरण्य
कशि पुना विचित्रं वैशसं हिंसां संप्रापितोपि ८ श्रीगोविंदविष्णवे नमः ७

देहादीनामसारतां निश्चित्याकुतोभयं ध्रुवं च भगवतः पादपद्ममेव प्रपेदे अथ तस्मा
दहमपि दैवेन तस्यैव भाग्येन लब्धांतिकं नीत इति चतुर्णामन्वयः अंततः आयुषो

किमात्मनानेन जहाति योंततः किं रिक्थहारैः स्वजनाख्यदस्युभिः
किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः १
इत्थं स निश्चित्य पितामहो महानगाधबोधो भगवतः पादपद्मं ध्रुवं
प्रपेदे ह्यकुतोभयं जनात् भीतः स्वपक्षक्षपणस्य सत्तमः १० ५

ते रिक्थहारैः पुत्रैः इह गेहेषु केवलमायुषो व्यय एव न तु सुखं किंचित् १ सः प्रसि
द्धो महान् स्वपक्षं दैत्यकुलं क्षपयतीति तथा तस्यापि १० श्रीगोपाल श्रीकृष्ण

अथतस्मात् अहमपिदैवेनतस्यैवभाग्येननवांतिकंनीतः प्रसभंबलात्त्यजि
ताश्रीर्यस्य यथाश्रियास्तब्धमतिः सन्सुमानिदंजीविनम्ध्रुवंनबुध्यते कथंभू

॥ ७ ॥ अथाहमप्यात्मरिपोस्तवांतिकंदैवेननीतः प्रसभंत्याजितः श्रीः इदंकृतांतां
तिकवर्त्तिजीवितंयया ध्रुवंस्तब्धमतिर्नबुध्यते ॥ शुक उ० तस्येत्थंभाषमाण
स्यप्रह्लादोभगवत्प्रियः आजगामकुरुश्रेष्ठराकापतिरिवोत्थितः १२ तमिंद्रसे
नः स्वपितामहंश्रियाविराजमानंनलिनायतेक्षणं प्रांशुंपिशंगांबरमंजनत्विषंप्र
लंबबाहुंसुभगंसमैक्षत १३

तं कृतांतस्यांतिकवर्त्तिमृत्योःसन्निहितं ॥ राकापतिः पूर्णेंदुः १२ अंजनत्विषंश्यामं १३

स्वकृताहंकारादिरूपापराधस्मरणेन सव्रीडं नीचीनमधोमुखं यस्य सः १४ शिर

तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ननाम
मूर्ध्नास्रुविलोललोचनः सव्रीडनीचीनमुखो बभूव ह १४ स तत्र
हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं उपेत्य भूमौ
शिरसा महामना ननाम मूर्ध्ना पुलकास्रुविह्वलः १५ श्रीराम

सा नमन्नेवउपेत्य मूर्ध्ना ननाम बलेस्तत्कृतमनुग्रहं दृष्ट्वा पुलकैरस्रुभिश्च विह्व

लः॰ १५

त्वयैवेति नत्वैंद्रंपदमेतदीयंतयापहृतंकिंतुत्वदीयमेवपुनःस्वीकृतंतच्चशोभ
नमेवकृतं तत्रहेतुः मन्यइति ययस्माच्छ्रीरेवयदात्ममोहनंतस्माद्विभ्रंशितः १६

प्रह्लादउ० त्वयैवदत्तंपदमैंद्रमूर्जितंहृतंतदेवाद्यतथैवशोभनं म
न्येमहानस्यकृतोह्यनुग्रहोविभ्रंशितोयच्छ्रियआत्ममोहनात् १६
ययाहिविद्वानपिमुह्यतेयतस्तत्कोविचष्टेगतिमात्मनोयथा तस्मै
नमस्तेजगदीश्वरायवैनारायणायाखिललोकसाक्षिणे १७ ७

मोहनत्वमेवाह ययाश्रियाविद्वानपियत्तःसंयतोपिमुह्यते ततस्तांसत्त्वांकोऽन्यः
पुमानात्मनोगतिंतत्त्वंयथावद्विचष्टेपश्यति तस्मैमहाकारुणिकाय १७ ७ ७

तस्यप्रह्लादस्यानुश्रृण्वतः उवाचेतिकिंचिद्वक्तुंप्रवृत्तइत्यर्थः १८ तदेवविंध्यावलि
रपिवक्तुंप्रवृत्ता तांचसन्मानयन्हिरण्यगर्भः क्षणंतूष्णींस्थितः अतस्तस्याए

श्रीशुकउवाच तस्या नुश्रृण्वतोराजन्प्रह्लादस्यकृतांजलेः
हिरण्यगर्भोभगवानुवाचमधुसूदनं १८ बद्धंवीक्ष्यपतिंसा
ध्वीतत्पत्नीभयविह्वला प्रांजलिः प्रणतोपेंद्रंबभाषेवाङ्मु
खीनृप १९

वचावाक्यंप्रथममवतारयति बद्धंवीक्ष्येति १९ श्रीगोपालकृष्णाभ्यांनमः॥

त्रिजगतः कर्त्तुः प्रभोः पालकस्य अस्यतः संहर्त्तुश्चईश्वरस्यतवान्ये किमावहंति
किंसमर्पयंति त्वयाअवरोपितः कर्त्तृवादः कर्त्तारः स्वतंत्रावयमितिवादमात्र
मपिपेषांते अयंभावः लोकत्रयंमयार्पितंत्वत्तीयपदायदेहंसमर्प्यप्रतिश्रुत

बिंध्यावलिरुवाच क्रीडार्थमात्मनइदंत्रिजगत्कृतंतेस्वाम्यंतुतत्र
कुधियोपरईशकुर्युः कर्त्तुःप्रभोस्तवकिमस्यतआवहंतिसक्तह्रि
यस्त्वदवरोपितकर्त्तृवादाः २०

मत्तंकरोमीतिदेहादिषुस्वा म्याविष्कारेणब्रुवन्नयंकु
बुद्धिर्निर्लज्जश्च अतस्त्वमेसर्वस्यापिस्वामी अतोमंदबुद्धिमेनंकेवलंत्वत्कृपयाविमु
च्यपालयेति २०

नरेवं प्रह्लादस्य विंध्यावलेश्च परमार्थोत्तयाप्रसन्नो हरिः ब्रह्माणं तु लोकदृष्ट्यैव विज्ञाप
यति भूतभावनेति त्रिभिः २१ निग्रहानर्हत्वे हेतुः कृत्स्नेति सर्वस्वमेवाह आत्मे

ब्रह्मोवाच भूतभावन भूतेश देवदेव जगन्मय मुंचैनं हृतसर्वस्वं नायमर्हति निग्र
हं २१ कृत्स्ना तेऽनेन दत्ता भूर्लोकाः कर्मार्जिताश्च ये निवेदितं च सर्वस्वमात्माऽविक्ल
वया धिया २२ यत्पादयोरशठधीः सलिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां
अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमार्तिमृच्छेत् २३

ति २२ तदेव कैमुत्यन्यायेनाह यस्य तव पादयोः सलिलमात्रमपि प्रदाय सर्वोऽपि
जन उत्तमां गतिं प्राप्नोति तस्मै तुभ्यं असौ बलिः त्रिलोकीं दाश्वान् दत्तवान् आर्तिकं
थं प्राप्नुयात् २३

अविक्लवया अदीनया धिया आत्मा समर्पितः

तस्यविघ्नः अर्थात् ननर्थापहारः कोयमनुग्रहः तत्राह यन्मदः येरर्थैर्मदोयस्य
सः अतएवस्तब्धः अनम्रः सन्महत्स्तमहेतूनामर्थानामपहारएवानुग्रहइत्यर्थः

श्रीभगवानुवाच ब्रह्मन्यमनुगृण्हामितद्विशो विधुनोम्यहं यन्मदः
पुरुषः स्तब्धोलोकंमांचावमन्यते २४ यदाकदाचिज्जीवात्मासंसर
न्निजकर्मभिः नानायोनिष्वनीशोऽयंपौरुषींगतिमाव्रजेत् २५

२४ दुर्लभंपुरुषजन्मकथंविलुब्धवतोर्जीवस्यजन्मादिनिमित्तोगर्वोमहाहानिक
रस्तस्यचनाशोमहदनुग्रहादेवेत्याह यदेतिद्वाभ्यां अनीशः परतंत्रः सन्निजैः क
र्मभिः नानायोनिषुकृमिकीटादिषुसंसरन् २५

भा॰ अ॰

१३५

तत्रपौरुष्यांगतोजन्मादिभिरस्ययदिस्तंभोनभवेत् तर्हिअयंमदनुग्रहएव २६
कथंतर्हिध्रुवादिभ्यःसंपदोदद्दासीतिचेत् तत्राह मानएवस्तंभः अनम्रतातस्य
निमित्तभूतानांसमंततःसर्वश्रेयःप्रतिकूलानांजन्मादीनांसत्त्वेपिजन्मादिभि

जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः यद्यस्यनभवेत्स्तंभस्तत्रा
यंमदनुग्रहः २६ मानस्तंभनिमित्तानांजन्मादीनांसमंततः स
र्वश्रेयःप्रतीपानांहन्तमुह्येन्नमत्परः २७

रितिवा हंतहेब्रह्मन्मत्परोनमुह्येत् अलोभक्तस्येछयासंपदोऽपिददामि अ
भक्तस्तुमुह्येदितितदपहाररूपमेवतस्यानुग्रहंकरोमीतिभावः २७

१३५
१३५

अस्यचेदानींमत्सरत्वादन्यैः उश्वापमपिदास्यामीतिवक्तुंतस्यमोहाभावमाह
एषइतितिसृभिः २८ २९ नह्येतास्मिन्कुलेकश्चिन्निःसत्वःकृपणःपुमानित्यादि

एषदानववैदेह्यानामग्रणीःकीर्तिवर्द्धनः अजैषीद्द्वन्द्वयुद्धमायांसी
द्गापिनमुह्यति २८ क्षीणरिक्थश्च्युतःस्थानात्क्षिप्तोबद्धश्चशत्रु
भिः ज्ञातिभिश्चपरित्यक्तोयातनापरियापितः २९ गुरूणामर्थि
तःशश्वोजहौसत्यंनसुव्रतः छलैरुक्तोमयाधर्मोनायंसजतिसत्य
वाक् ३०

नाछलैरेवमयाधर्मउक्तः तथापितंधर्ममयंनसजति अतःसत्यवाक् ३० ७

मेमया अहमेवाश्रयः पालकोयस्यसः ३१ स्थानंप्रापितइतियदुक्तंतदेवस्थान
माह तावत्तसावर्णिमन्वंतर पर्यंतंसुतलमध्यास्तांअधिवसतिस्यर्थः यद्यस्मि

एषमेप्रापितः स्थानंदुष्प्रापममरैरपि सावर्णे तरस्यायंभवितेंद्रो
मदाश्रयः ३१ तावत्सुतलमध्यास्तांविश्वकर्मविनिर्मितं यत्राधि
योव्याधयश्चक्लमस्तंद्रापराभवः ३२ नोपसर्गानिवसतांसंभवंति
ममेक्षया ३२ इंद्रसेनमहाराजयाहिभोभद्रमस्तुते सुतलंस्वर्गिभिः
प्रार्थ्यंज्ञातिभिः परिवारितः ३३

न्निवसतांआध्यादयोममेक्षयानसंभवं
ति ३२ एवंब्रह्माणंप्रत्युक्त्वाकरुणापरवशः साक्षाद्बलिंप्रत्याह इंद्रसेनेतिचतुर्भिः

३३

त्वछासनंअतिगछंतिअतिवर्त्तंतइतितथातान् ३४ तथाऽपि भगवद्विद्विषोगात्वद
निछंतंप्रसाह्य सदेति ३५ संगाद्यआसुरोभावःसविनंक्ष्यति ३६ इतिश्रीभागव

नत्वामभिभविष्यंतिलोकेशाः किमुता परे त्वछासनातिगान्दैत्या
नक्रैश्चेमेसूदयिष्यति ३४ रक्षिष्येसर्वतोऽहंत्वांसानुगंसपरिछदं स
दासन्निहितंवीरतत्रमांद्रक्ष्यतेभवान् ३५ तत्रदानवदैत्यानांसंगा
तेभावंआसुरः दृष्टामदनुभावंवैसद्यःकुंठोविनंक्ष्यति ३६ इतिश्री
भागवतम० अ० बलिमोक्षणंनामद्वाविंशः २२
तेम० टी० द्वाविंशः २२

त्रयोविंशेवलोपातेसुतलंसपितामहे उपेंद्रेणदिवंगत्वापूर्ववन्मोदतेहरिः १

श्रीशुकउवाच इत्युक्तवंतंपुरुषंपुरातनंमहानुभा
वोऽखिलसाधुसंमतः बद्धांजलिर्बाष्पकलाकुलेक्ष
णोभक्त्युत्कलोगद्गदयागिराब्रवीत् १ ७

वाष्पस्यकलाभिर्बिंदुभिराकुलेईक्षणेयस्य भक्त्याउत्कलः उत्कंठः १ ७

अहोत्वत्प्रणामस्यमहिमा यदर्थंकृतः समुद्यमएवप्रपन्नानांभक्तानांयो॰
र्थः तस्यविधौअभक्तेपितस्यसंपादनेसमाहितः अप्रमत्तः स्थितः कुतः यत्प्र
नोद्यमेनलोकपालैरमरैः सत्वप्रधानैरपिअलब्धपूर्वस्त्वनुदेयग्रहः अपसद्देनी

बलिरुवाच अहोप्रणामायकृतः समुद्यमः प्रपन्नभक्तार्थविधौ
समाहितः यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेसुरे

चेराजसेमयिअर्पितः अयंभावः परमेश्वरायतुभ्यमहंवराकस्त्रिलोकींदत्तवा
निस्सेनदास्तां प्रणामोपिनसम्यक्कृतः किंतुतदर्थमुद्यममात्रंकृतंतेनचकर्मत
पोदानादिकोटिभिरप्यलभ्यस्त्वदनुग्रहः संपादितः अहोत्वत्प्रणामप्रभावाश्चर्य
मिति २

३ अशासत्तत्पेंद्रः सन्मालयामास ४ ५ दुर्गपालो सिरास्थिष्ये सर्वतो हम्बिमु

श्रीशुक उ० इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ३ एवमिंद्राय भगवान् प्रत्यानीय त्रिविष्टपं पूरयित्वादितेः काममशासत् सकलं जगत् ४ लब्धप्रसादं निर्मुक्तं पौत्रं वंशधरं बलिं निशाम्य भक्तिप्रणतः प्रह्लाद इदमब्रवीत् ५ प्रह्लाद उ० नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते यन्नो ऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरभिवंदितांघ्रिः ६

कलात ६

हेशरणद आश्रयप्रद येकुस्त्तयः दुर्वृत्ताः खलयोनयः उग्रजातयश्चतेवयंतस्य
भवतोदाक्षिण्यदृष्टेः पदवींकस्माद्धेतोः प्रणीताः बहुमानेनचित्तानुवर्त्तनंदा

यत्पादपद्ममकरंदनिषेचणेनब्रह्मादयः शरणदा
ऽश्नुवतेविभूतीः कस्माद्धयंकुसृतयः खलयोनयस्ते
दाक्षिण्यदृष्टिपदवींभवतः प्रणीताः ७

क्षिण्यंतेनयादृष्टिस्तद्विषयत्वंप्रापिताः ७ ७ ७ ७

भक्तप्रियत्वादिति चेत् तर्हि एवं तवेहितं अहो चित्रं किं तत् सर्वात्मनः समदृशश्च
स्वभावो विषम इत्येतत् सर्वात्मत्वे चित्रचरितत्वे हेतुः अमिता अविंसा योगमाया
लीला तया विसृष्टानि रचितानि भुवनानि येन तस्य अहो इत्यत्र संधिरार्षः स

चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य सर्वात्मनः स
मदृशो विषमः स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ८ श्रीभगवानु॰ वत्स
प्रह्राद भद्रं ते प्रयाहि सुतलालयं मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ९

महत्त्वे हेतुः विशारदस्य सर्वज्ञस्य अथवा भक्तप्रियत्वेऽपि तव वैषम्यं नास्त्येव यतः
कल्पतरुस्वभावः सन् भक्तप्रियोऽसि नहि कल्पतरुराश्रितानामेव कामान्पूरयन्नपि वि
षमो भवतीत्यर्थः

मद्दर्शनेनयोमहाह्लादस्तेनध्वस्तंकर्मबंधनमज्ञानंयस्य १० ११ १२ १३

नित्यंद्रष्टासिमांतत्रगदापाणिमवस्थितं मद्दर्शनमहाह्लादध्व
स्तकर्मनिबंधनः १० श्रीशुकदेवउवाच आज्ञांभगवतोराज्ञ
न्प्रह्लादोबलिनासह बाढमित्यमलप्रज्ञोमूर्ध्न्याधायकृतां
जलिः ११ परिक्रम्यादिपुरुषंसर्वासुरचमूपतिः प्रणतस्तदनुज्ञा
तः प्रविवेशमहीबिलं १२ अथाहोशनसंराजन्हरिर्नारायणोंति
के आसीनमृत्विजांमध्येसदसिब्रह्मवादिनां १३ श्रीवामनाय
ॐ नमोभगवतेश्रीनारायणाय

कर्मवितन्वतःशिष्यस्ययत् छिद्रमंतरंन्यूनंजातंतत्संतनु विस्तारयसंधत्स्व यज
मानंविनाकथंसंधातव्यमितिनवाच्यमित्याह यत्तदितिब्रह्मदृष्टब्राह्मणैर्दृष्टमेव

ब्रह्मन्संतनुशिष्यस्यकर्मछिद्रंवितन्वतः यत्तत्कर्मसुवैष
म्यंब्रह्मदृष्टंसमंभवेत् १४ श्रीशुकउवाच कुतस्तत्कर्मवै
षम्यंयस्यकर्मेश्वरोभवान् यज्ञेशोयज्ञपुरुषःसर्वभावेन
पूजितः १५

समंभवेत् किंपुनरनुष्ठितमित्यर्थः १४ भवान्यस्यसर्वेणापिभावेनवस्तुमात्रेण
पूजितस्तस्यकर्मसुकुतोवैषम्यं कथंभूतः कर्मणामीश्वरःप्रवर्तकः यज्ञेशः य
ज्ञफलदःयज्ञमयश्चपुरुषः १५

आस्तांतावत्त्वत्पूजायस्मान्मंत्रतः स्वरादिभ्रंशेनतंत्रतः व्युत्क्रमादिना देशतः काल
तश्च अर्हतः पात्रतः वस्तुतश्चदक्षिणादिना यत्छिद्रंन्यूनंतत्सर्वंतवानुकीर्तन

मंत्रतस्तंत्रतश्छिद्रंदेशकालार्हवस्तुतः सर्वंकरोतिनिःछिद्रंनामसंकी
र्तनंतव १६ तथापिवदतोभूमन्करिष्याम्यनुशासनं एतछ्रेयःपरंपुं
सांयत्तवाज्ञानुपालनं १७ शुकउवाच अभिनंद्यहरेराज्ञांउशनाभग
वानिति यज्ञछिद्रंसमाधत्तबलेर्विप्रर्षिभिःसह १८

मात्रमेवनिःछिद्रंकरोति १६ १७ इतिहरेराज्ञांप्रतिनंद्यबलेर्यज्ञछिद्रंसमाध
त्तसंदधे पाठांतरेसमाधायतामाज्ञांसंपादितवानितिशेषः १८ श्रीरामचंद्राय

१९ देवाश्च ऋषयश्च भूमिपाश्च मनवश्च तैः सहितः २० २१ ननु लोकादीनां पतिरिंद्रो

एवंबलेर्महींराजन्भिक्षित्वावामनोहरिः ददौभ्रात्रेमहेंद्रायत्रि
दिवंयत्परैर्हृतं १९ प्रजापतिपतिर्ब्रह्मादेवर्षिपितृभूमिपैः दक्ष
भृग्वंगिरोमुख्यैः कुमारेणभवेनच २० कश्यपस्यादितेःप्रीत्यैस
र्वभूतभवायच लोकानांलोकपालानामकरोद्वामनंपतिं २१ वे
दानांसर्वदेवानांधर्मस्ययशसःश्रियः मंगलानांव्रतानांचकल्पं
स्वर्गापवर्गयोः २२

स्त्येव सत्यं तथापि वेदादीनां पालनेकल्पं दक्षं २२ ७ ७

वामनंउपेंद्रंकल्पयांचक्रे २३ देवयानेनमार्गेण विमानेनेतिवा २४ २५ २६ २७

उपेंद्रंकल्पयांचक्रेपतिंसर्वविभूतये तदासर्वाणिभूतानिभृशंमुमुदिरेनृप २३ ततस्त्विंद्रःपुरस्कृत्यादेवयानेनवामनं लोकपालैर्दिवंनिन्येब्रह्मणाचानुमोदितः २४ प्राप्यत्रिभुवनंचेंद्रउपेंद्रभुजपालितः श्रियापरमयाजुष्टोमुमुदेगतसाध्वसः २५ ब्रह्माशर्वःकुमारश्चभृग्वाद्यामुनयोनृप पितरःसर्वभूतानिसि द्धावैमानिकाश्च ये २६ सुमहत्कर्मतद्विष्णोर्गायंतःपरमाद्भुतं धिष्ण्यानिस्वानितेजग्मुरदितिंच शशंसिरे २७ सर्वमेतन्मयाख्यातंभवतःकुलनंदन उरुक्रमस्यचरितंश्रोतृणा मघमोचनं २८ नमोनमः

एतच्चरितं सर्वमाख्यातमिति विशेषोत्स्या अन्यान्यपि संतीत्युक्तं तानि तर्हि निःशे
षाणि वर्णनीयानीत्यपेक्षायामाह पारमिति उरु बहुधा विक्रमतो विष्णोर्महिम्नः
पारं योऽग्रणानो भवति समर्त्यः पार्थिवानि रजांसि विममे गणितवान् यथा पार्थिव
परमाणुगणनमशक्यं तथा विष्णोर्गुणगणनमशक्यमित्यर्थः तथा च मंत्रः वि

पारं महिम्नो उरु विक्रमतो गृणानो यः पार्थिवानि विममे स रजांसि मर्त्यः किं जायमा
नो न जात उपैति मर्त्यः इत्याह मंत्रदृग् ऋषिः पुरुषस्य यस्य २८ ष्णोर्नु कं वीर्याणीति ए
तदेव मंत्रांतरार्थं सूचयन्नाह यस्य पुरुषस्य पूर्णस्य महिम्नः पारं मंत्रदृक् ऋषिर्वे
सिष्ठः इति एवमाह कथं किं जायमानो जातो वा उपैति न कोपीति वदन् अनंतत्वेनैव म
हेत्यर्थः तथा च मंत्रः न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमाप इति २९

यइदंशृण्वन्भवतिसपरांगतिंयाति ३० सुकृतंयथाबुद्धिः ३१ इतिश्रीभागवते महापुराणेटीकायांअ० त्रयोविंशोध्यायः २३ चतुर्विंशेप्रसंगेनमत्स्यरूपस्यशा

देव

यइदंदेवस्यहरे [illegible] रद्भुतकर्मणः अवतारानुचरितंशृण्वन्या तिपरांगतिं ३० क्रियमाणेकर्मणीदंदैवेपित्र्येथमानुषे यत्रयत्रा नुकी [illegible] तत्तत्तेषांसुकृतंविदुः ३१ इतिश्रीभागवतेमहापुराणेअ ष्टमस्कंधेवामनावतारानुचरितेत्रयोविंशतितमोध्यायः २३

त्यै

र्हिः णः॥ लीलोच्यतेयत्तः सत्यव्रतरक्षामहार्णवे १ श्रीगोपालकृष्णाभ्यांनमः॥७

तनुंतनुंनिदर्श्यादौनिजैश्वर्यनिदर्शनात् मत्स्यंपृच्छतिराजेतिशोलीलयावामनो
पमं २ माययामत्स्यविडंबनंमत्स्यरूपानुकरणंयस्यांनिरूप्यतेवा १ ननुकस्मा

श्रीराजोवाच भगवन्श्रोतुमिच्छामिहरेरद्भुतकर्मणः अवतार
कथामाद्यांमायामत्स्यविडंबनां १ यदर्थमदधाद्रूपंमात्स्यंलो
कजुगुप्सितं तमःप्रकृतिदुर्मर्षंकर्मग्रस्तइवेश्वरः २ श्रीराम

दकस्मादेवमस्यावतारश्रवणेच्छाश्रीवामन(सा)इत्यादिस्याह यदर्थमितिद्वाभ्यांदु
र्मर्षंदुःसहं २

बलेरनुग्रहाययज्जुगुप्सितमपियाचकरूपंधृतवानितियुक्तमुक्तंयदर्थंतुलोकजुगु
प्सितंमात्स्यंरूपमधारयत् एतन्नोयथावद्वक्तुमर्हसीत्यर्थः २४ सामान्येनाव

एतन्नोभगवन्सर्वंयथावद्वक्तुमर्हसि उत्तमश्लोकचरितंस
र्वलोकसुखावहं ३ श्रीसूतउवाच इत्युक्तोविष्णुरातेनभ
गवान्बादरायणिः उवाचचरितंविष्णोर्मत्स्यरूपेणयत्कृतं ४
शुक उ० गोविप्रसुरसाधूनांछंदसामपिचेश्वरः रक्षामिछंस्त
नूर्धत्तेधर्मस्यार्थस्यचैवहि ५

तार प्रयोजनमाह गोविप्रे ति ५

जुगुप्सितत्वंपरिहरति धियोगुणैर्यान्युच्चावचानिरूपाणितेषुनियंतृत्वेनचरन्न
पीश्वरोनोच्चावचत्वंभजतेनिर्गुणत्वात् कुतःपुनःशुद्धसत्वमयैर्मत्स्याद्याकारैरु

उच्चावचेषुभूतेषुचरन्वायुरिवेश्वरः नोच्चावचत्वंभजतेनिर्गु
णत्वाद्धियोगुणैः ६ आसीदतीतकल्पांतेब्राह्मोनैमित्तिकोलयः
समुद्रोपप्लुतास्तत्रलोकाभूरादयोनृप ७

च्चावचत्वशंकेतिभावः ६ विशे
षतोमत्स्यावतारप्रयोजनमाह आसीदितित्रिभिः ब्रह्मणोनिद्रायांभवोब्राह्मः ते
नैवनिमित्तेनजातोनैमित्तिकः समुद्रेउपप्लुतानिमग्नाः ७

अंतिके निःसृतान् ८ शफरीरूपं मत्स्यरूपं ९ प्रयोजनांतरं च लीलाप्रकारं चाह त

कालेनागतनिद्रस्य धातुः शिशयिषोर्बली मुखतो निःसृतान् वेदान्
हयग्रीवोंऽतिकेऽहरत् ८ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितं दधा
र शफरीरूपं भगवान् हरिरीश्वरः ९ तत्र राजर्षिः कश्चिन्नाम्ना सत्य
व्रतो महान् नारायणपरोऽतप्यत्तपः स सलिलाशनः १० योऽसाव
स्मिन्महाकल्पे तनयः स विवस्वतः श्राद्धदेव इति ख्यातो मनुत्वे हरि
णार्पितः ११

त्र राजऋषिरित्यादि यावत्समाप्ति १० स एव श्राद्धदेव इति ख्यातः ११ २ श्रीराम

श्री३

एकदाकृतमालायांकुर्वतोजलतर्पणं तस्यांजल्युदकेकाचित् शफर्ये
का न्यपद्यत १२ सत्यव्रतोंजलिगतांसहतोयेनभारत उत्ससर्ज्जन
दीतोयेशफरींद्रविडेश्वरः १३ तमाहसातिकरुणंमहाकारुणिकंनृपं
यादोभ्योज्ञातिघातिभ्योदीनांमांदीनवत्सल १४ कथंविसृजसेराज
न् भीतामास्मिन्सरिज्जले १४ तमात्मनोनुग्रहार्थंप्रीत्यामत्स्यवपु
धरं अजानन्रक्षणार्थायशफर्याःसमनोदधे १५ तस्यादीनतरंवाक्य
माश्रुत्यसमहीपतिः कलशाप्सुनिधायैनांदयालुर्निन्यआश्रमं १६ ७

१७ यत्राहंसुखंनिव सामितद्रोकः स्थानंकल्पय १८ औदंचनोदकेमणिकस्येजले

सा खुवत्रैकरात्रेणवर्धमानाकमंडलौ अलब्ध्वाःत्मावकाशंचवृद्दमाहम
हीपतिं १७ नाहंकमंडलावस्मिन्नल्पंवस्तुमिहोत्सहे कल्पयोकःसुवि
पुलंयत्राहंनिवसेसुखं १८ सएनांततआदायन्यधादौदंचनोदके त
त्रक्षिप्तामुहूर्तेनहस्तत्रयमवर्धत १९ नमएतदलंराजन्सुखंवस्तु
मुदंचनं पृथुदेहिपदंमह्यंयत्वाहंशरणंगता २० ततआदायसाराज्ञा
क्षिप्ताराजन्सरोवरे तदाःवृत्यात्मनासोपमहामीनोऽन्ववर्धत २१

१९ २० २१

रक्षायायोगेनोपायेन यथा महाह्रदप्राप्तेरर्वाग्जलं विना न शुष्येयं तेनोपायेन निधेहि

नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः निधेहि रक्षायोगेन ह्रदे मामविदासिनि २२ इत्युक्तः सोनयन्मत्स्यं तत्र तत्राविदासिनि जलाशयेसंमितं तं समुद्रे प्राक्षिपत्झषं २३ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः अदंत्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि २४ एवं विमोहितस्तेन वदता वल्गुभारतीं तमाह कोभवानस्मान्मत्स्यरूपेण मोहयन् २५

अविदासिनि अनुपक्षये २२ संमितं तत्तज्जलाशयपरिमितं संतं २३ २४ २५

अभिव्यानशे व्याप्तवान् २६ २७ मुख्यः सख्यः आत्माचगतिश्चआश्रयः २८

नैवंवीर्योजलचरोदृष्टोस्माभिःश्रुतोपिवा योभवान्योजनशतम
न्हाभिव्यानशेसरः २६ नूनंत्वंभगवान्साक्षात्हरिर्नारायणोव्ययः
अनुग्रहायभूतानांधत्सेरूपंजलौकसां २७ नमस्तेपुरुषश्रेष्ठस्थित्यु
त्पत्त्यप्ययेश्वर भक्तानांनःप्रपन्नानांमुख्योह्यात्मगतिर्विभो २८
सर्वेलीलावतारास्तेभूतानांभूतिहेतवः ज्ञातुमिच्छाम्यदोरूपंयदर्थं
भवताधृतं २९

२९ श्रीरामचंद्रायपरमात्मनेनमोनमः ५ ५

हेअरविंदाक्ष पृथगात्मनांदेहाद्यभिमानिनांसतामितरेषांयदोपसर्पणंयथाम्र
षाभवेत् तथासर्वसुहृत्प्रियात्मनस्तवपादोपसर्पणंम्रषानभवेत् यद्यस्मात्तेने

नतेरविंदाक्षपदोपसर्पणंम्रषाभवेत्सर्वसुहृत्प्रियात्मनः यथेतरेषां
पृथगात्मनांसतामदीदृशोयद्वपुरद्भुतंहिनः ३० शुकउ॰ इतिब्रुवाणं
नृपतिंजगत्पतिःसत्यव्रतंमत्स्यवपुर्युगक्षये विहर्तुकामः प्रलयार्ण
वेऽब्रवीच्चिकीर्षुरेकांतजनप्रियःप्रियं ३१ भक्तानामद्भुतंवपुरदीदृशः द

र्शितवानसि यथांतरेपृथगात्मनोभेददर्शिनः पुंसः असतांपरिछिन्नानांपदोपसर्प
णंयथाम्रषेत्यर्थः ३० एकांतजनाभक्ताःप्रियायस्य ३१

अप्ययांभो धौप्रलयार्णवे भूर्भुवरादिकमित्यर्थः ३३ संवर्त्तोभसिप्रलयोदके त्वामुप

श्रीभगवानुवाच सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम निमंक्ष्यत्य स्य्ययांभोधौ त्रैलोक्यं
भूर्भुवादिकं ३२ त्रिलोक्यांलीयमानायांसंवर्त्तांभसिवैतदा उपस्थास्यतिनौःकाचि
द्विशालात्वांमयेरिता ३३ त्वंतावदोषधीःसर्वा बीजान्युच्चावचानिच सप्तर्षिभिःपु
रिवृतःसर्वसत्वोपबृंहितः ३४ आरुह्यबृहतींनावंविचरिष्यस्य विक्लवः एकार्ण
वेनिरालोकेऋषीणामेववर्चसा ३५ दोधूयमानांतांनावंसमीरेणबलीयसा उप
स्थितस्यमेशृंगेनिबध्नीहिमहाहिना ३६

स्थास्यतिप्राप्स्यति ३४ ओषधीःआदा
येतिशेषः ३४ ऋषीणामेवालोकेनविचरिष्यासि ३५ महाहिनावासुकिना ३६

३७ मेमयाअनुगृहीतंप्रसादीकृतं हृदिअपरोक्षंवेत्स्यसित्वयाकृतैः संप्रश्नैर्मे अहंत्वामृषिभिः साकंसहनावमुदन्वति विकर्षन्‌विचरिष्यामियावत्‌ ब्राह्मीनिशाप्रभो ३७ मदीयंमहिमानंचपरब्रह्मेतिशब्दितं वेत्स्यस्यनुगृहीतंमेसंप्रश्नैर्विवृतंहृदि ३८ इत्यमादिश्यराजानंहरिरंतरधीयत सोऽन्ववैक्षततंकालंयंहृषीकेशआदिशत्‌ ३९ आस्तीर्यदर्भान्प्राक्कूलान्‌ राजर्षिःप्रागुदङ्मुखः निषसादहरेःपादौचिंतयन्मत्स्यरूपिणः ४० ततःसमुद्रउद्वेलः सर्वतःप्लावयन्महीं वर्द्धमानोमहामेघैर्वर्षद्भिःसम दृश्यत ४१ यावित्वंप्रकाशितंसंतं ३८ ३ ३९ ४० ४१ श्रीरामचंद्राय॰

४२ ४३ ४४ वरत्रेणदोरकरूपेण ४५ सागरंतारयिष्यंतंतरिष्यन्निवसागरं

ध्यायन्भगवदादेशंददृशेनावमागतां तामारुरोहविप्रेंद्रैरादायौषधिवीरुधः ४८
तमूचुर्मुनयःप्रीताराजन्ध्यायस्वकेशवं सवैनःसंकटादस्मादविताशंविधास्यति
४९ सोऽनुध्यातस्ततोराज्ञाप्रादुरासीन्महार्णवे एकशृंगधरोमत्स्योहैमोनियुतयो
जनः ४७ निबध्यनावंतच्छृंगेयथोक्तोहरिणापुरा वरत्रेणाहिनातुष्टस्तुष्टावमधु
सूदनं ४५ राजोवाच अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः
यदृच्छयेहोपसृतायमाप्नुयुर्विमुक्तिदोनःपरमोगुरुर्भवान् ४६ सत्यव्रतोगुरुत्वेन

तुष्टावहरिमष्टभिः १ अत्रेदंचिंत्यं किमयंमहाप्रलयोदैनंदिनोवेति तत्रतावत्ब्रा

स्योलयइतियोऽसावस्मिन्महाकल्पइतिचोक्तेर्महाप्रलयइतिभाष्यंनेतिब्रूमः महाप्र
लयेपृथिव्यादीनामवशेषासंभवात् यावद्ब्राह्मीनिशेत्याद्युक्तिविरोधाच्च अतोदै
नंदिनइतियुक्तं नचैतदपिसंगच्छते सांवर्तकैरनावृष्ट्यादिभिर्विनाऽकस्माद्दिवस
मेहनित्रैलोक्यंनिमंक्ष्यतीतिमत्स्योक्तेरनुपपत्तेः यच्चोक्तंप्रथमस्कंधे रूपंसजगृ
हेमात्स्यंचाक्षुषांतरसंप्लवे नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुमिति तदपित
दाउर्घटं नहिप्रलयद्वयेऽपिमहीमय्यांनाव्यारोहः संभवति नचचाक्षुषमन्वंतरे
प्रलयोस्ति तथाचसतिसप्तमोमनुर्वैवस्वतइत्यपिदुर्घटंस्यात् तत्तदावद्दोषधीः स
र्वाइत्यादिनिर्देशोऽपिनसंगच्छते नहितदाओषध्यादीनांसत्वानांचावशेषः संभ
वति तस्मादन्यथावर्ण्यते नैवायंवास्तवः कोपिप्रलयः किंतुसत्यव्रतस्यज्ञानोप

देशायाविर्भूतोभगवान्वैराग्यार्थमकस्मात्प्रलयमिवदर्शयामास यथाऽस्मिन्ने
ववैवस्वतमन्वंतरेमार्कंडेयायदर्शितवान्तदपेक्षयैवचमहाकल्पेऽस्मिन्निति विशे
षणंसंगच्छते तथाचततःसमुद्रउद्वेलःसर्वतःसमदृश्यतेतितस्यैवतथादर्शनमु
क्तमित्येषादिक् प्रस्तुतंस्तोत्रंव्याख्यास्यामः तत्रनानायोनिषुसंसरतःस्वस्य
भगवद्रूपयैवतत्त्वाक्षिंदृष्ट्वामुक्तयेतमेवप्रार्थयते अनादिर्याऽविद्यातयापह
ताआवृताआत्मसंविद्येषांते अतएवाविद्यामूलसंसारपरिश्रमैरातुराःइहसं
सारेयदृच्छयायदनुग्रहाद्देवउपस्थिताःसंतोयमाप्नुयुः सभगवानेवसाक्षान्नोगु
रुःसन्ग्रंथिंभिंद्यादित्युत्तरेणान्वयः ५६ श्रीरामचंद्रायनमोनमः ७ ५४०
ननुवैराग्यंविनाकुतोमुक्तिःतर्हितस्यतत्त्वस्यैवैकफलत्वात्तमेवामादिशेत्याशयेनाह

अबुधोयंजनः असुखंयथाभवतितथाकर्मसमीहते तांसुखेछांलहृदयरूपंग्रंथिंसं
भिंद्यात् यतः सएवपरोगुरुः ४७ ननुयज्ञदानादिभिः सत्वशुद्धिंविनाकथंग्रंथिभे
दः स्यात् तत्राह यस्यसेवयैवपुमानात्मनोमनसोमलंतमोविजह्यात् एषप्रही

जनोबुधोयंनिजकर्मबंधनः सुखेछयाकर्मसमीहतेसुखं यत्सेवयातांविधुनोत्य
सन्मतिंग्रंथिंसभिंद्याद्धृदयंसनोगुरुः ४७ यत्सेवयाग्नेरिवरुद्ररोदनंपुमान्विजह्या
न्मलमात्मनस्तमः भजेतवर्णंनिजमेषनोगुरुर्भूयात्सईशःपरमोगुरुर्गुरोः ४८

णमलः निजंवर्णंचस्वरूपंभजेत् सईशोगुरुर्भूयात् यतः सएवगुरोरपिपरमोगुरुः
मलहानेदृष्टांतः रुद्ररोदनंरजतं यद्रोदितुद्रस्यरुद्रत्वंयद्वशीर्यततद्रजतंहिरण्य

मभ्रवदितिश्रुतेः तद्यथाग्नेःसंपर्कात्मलंजहाति स्वंवर्णंभजते नतुक्षालनादिभिर्मल

त्यागः तथानयज्ञादिभिः किंतुत्वत्सेवयैव तेषांतुसेवांगत्वमेवेतिभावः ४९ परमेश्वरत्वं

परमगुरुत्वंचप्रपंचयन्नाह यत्प्रसादस्यायुतभागः तस्यलेशमात्रमपिअन्येदेवादयः

सर्वेसमेताअपिस्वयंतन्निरपेक्षाः संतः कर्तुंनप्रभवंति ५० तदेवहृष्टांतेनस्पष्टय

तयत्प्रसादायुतभागलेशमन्येचदेवागुरवोजनाःस्वयं कर्तुंसमेताःप्रभवंतिपुंस

स्त्वामीश्वरंतंशरणंप्रपद्ये ५० अचक्षुरंधस्ययथाग्रणीः कृतस्तथाजनस्याविदुषो

ऽबुधोगुरुः त्वमर्कदृक्सर्वदृशांसमीक्षणोवृत्तोगुरुर्नःस्वगतिंबुभुत्सुभिः ५१

माह अचक्षुरितिअविदुषोजनस्य अबुधोः विद्वान्गुरुस्तथैवअर्कप्रकाशवत्स्वतए

वदृक्ज्ञानंयस्यसःअर्कदृशांसर्वेंद्रियाणांसमीक्षणःप्रकाशकः अतएवस्वगतिंबोद्धु

भिच्छद्भिर्नोऽस्माभिर्गुरुर्वृतोसि ५१ किंच प्राकृतो गुरुरनर्थहेतुरित्याह जनइति॥ आदिशन्तेउपदिशन्ति असतीं मतिं अर्थकामादिमतिं तमः संसारं ५२ ननु तर्हि

जनोजनस्यादिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः त्वं त्वव्ययं ज्ञानममोघमंजसा प्रपद्यते येन जनो निजं पदं ५२ त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिदः तथापि लोको न भवंतमंधधीर्जनाति संतं हृदि बद्धकामः ५३

सर्वोपि लोकः मामेव किं नोपसरति अज्ञानादित्याह त्वमिति प्रियश्चासावीश्वरश्च

५३

अहंतुत्वामेवशरणंयामीत्याह तंत्वामिति प्रतिबोधनायउपदेशाय अर्थदीपैः प
रमार्थप्रकाशकैः हृदयेभवान्ग्रंथीन्अहंकारादीन् स्वमोकःस्वरूपंविरणु प्रका

तंत्वामहंदेववरंवरेण्यंप्रपद्यईशंप्रतिबोधनाय छिंध्यर्थदीपैर्भगव॰
न्वचोभिर्ग्रंथीन्हृदय्यान्विरणुस्वमोकः ५४ सुक उ॰ इत्युक्तवंतंनृप
तिंभगवानादिपूरुषः मत्स्यरूपीमहांभोधौविहरंस्तत्वमब्रवीत् ५५
पुराणसंहितांदिव्यांसांख्ययोगक्रियावतीं सत्यव्रतस्यराजर्षेरात्म

गुह्यमशेषतः ५६

शय ५४ नृपतिंप्रति ५५ पुराणसंहितांमत्स्यपुराणं अशेषतः अब्रवीदित्यनुषंगः
५६

५७ अतीतः पूर्वोयः प्रलयः तस्यापाये अवसाने ५८ ज्ञानं शास्त्रीयं विज्ञानमनु

अश्रौषीदृषिभिः साकमात्मतत्वमसंशयं नाव्यासीनो भगवता प्रोक्तं
ब्रह्मसनातनं ५७ अतीतप्रलयापायउत्थितायसवेधसे हत्वाऽसुरंह
यग्रीवंवेदान्प्रत्याहरद्धरिः ५८ सतुसत्यव्रतोराजाज्ञानविज्ञानसंयुतः
विष्णोः प्रसादात्कल्पेस्मिन् आसीद्वैवस्वतोमनुः ५९ सत्यव्रतस्यराज
र्षेर्मायामत्स्यस्यशार्ङ्गिणः संवादंमहदाख्यानंश्रुत्वामुच्येतकिल्बिषा
त् ६० अवतारंहरेर्योऽमुंकीर्त्तयेदन्वहंनरः संकल्पास्तस्यसिध्यंतिस
यातिपरमांगतिं ६१

भवः ५९ ६० योऽयंहरेरवतारस्तंयः कीर्तयेत् ६१

सत्यव्रतानांसत्यव्रतस्यऋषीणांच छत्रिणोगच्छंतीतिवल्लिंगसमवायाद्बहुवचनं जिह्ममीनंमायामत्स्यं ६२ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेभावार्थदी

प्रलयपयसिधातुःसुप्तशक्तेर्मुखेभ्यःश्रुतिगणमपनीतंप्रत्युपादत्त हत्वा दितिजमकथययोब्रह्मसत्यव्रतानांतमहमखिलहेतुंजिह्म मीनंनतोऽस्मि ६२ इतिश्रीभागवतेमहापुरा॥णे अष्टमस्कंधेपारम हंस्यसंहितायांभागवतेमत्स्यावतारचरितानुवर्णनंनामचतुर्विंशोध्यायः

पिकायांश्रीधरस्वामिविरचितायांचतुर्विंशोध्यायः २४ समाप्तोयमष्टमः ८

[OrderDescription]
,CREATED=21.01.20 11:14
,TRANSFERRED=2020/01/21 at 12:15:26
,PAGES=304
,TYPE=STD
,NAME=S0002585
,Book Name=M-2615-BHAGWAT MAHAPURAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF

FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,